Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप. सोमायेति प्रजापतिरृषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनियोगः ॥ ॐ सो
२३ माय स्वाहा इदं सोमाय न मम ॥ एतावाज्यभागौ ॥ ततो ब्रह्मणाऽन्वारब्धः आज्येन
ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय न मम ॥ ॐ वायवे स्वाहा इदं वायवे न मम ॥ ॐ
ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ इति यजु
र्वेदाहुतयः ॥ ॐ पृथिव्यै स्वाहा इदं पृथिव्यै न मम ॥ ॐ अग्नये स्वाहा इदमग्नये न म
म ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥
इति ऋग्वेदाहुतयः ॥ ॐ दिवे स्वाहा इदं दिवे न मम ॥ ॐ सूर्याय स्वाहा इदं सूर्याय न रामः २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥
इति सामवेदाहुतयः ॥ ॐ दिग्भ्यः स्वाहा इदं दिग्भ्यः ॥ ॐ चन्द्रमसे स्वाहा इदं चन्द्रम
सेम मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो
न मम ॥ इत्यथर्ववेदाहुतयः ॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ इति मन
सा ॥ ॐ देवेभ्यः स्वाहा इदं देवेभ्यो न मम ॥ ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो न मम ॥
ॐ श्रद्धायै स्वाहा इदं श्रद्धायै न मम ॥ ॐ मेधायै स्वाहा इदं मेधायै न मम ॥ ॐ स
दसस्पतये स्वाहा इदं सदसस्पतये न मम ॥ ॐ अनुमतये स्वाहा इदमनुमतये न म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म ॥ ततोऽन्वारब्धः ॥ व्याहृतीनां प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्निवायुसू
र्या देवता आज्यहोमे विनियोगः ॥ ॐ भूः स्वाहा इदमग्नये न मम ॥ ॐ भुवः स्वाहा
इदं वायवे न मम ॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ॐ त्वन्न इति मन्त्रस्य वाम
देवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः ॥ ॐ त्वन्नो अग्ने
वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो वि
श्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्निवरुणाभ्यां न मम ॥ ॐ सत्वन्न इ
ति मन्त्रस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निवरुणौ देवते आज्यहोमे विनियोगः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ सत्वन्नो अग्ने वमो भवोतीनेदिष्ठो अस्या उषसो व्युष्टो ॥ अवयक्ष्वनो वरुण(ं)
रराणो वीहिमृडीक(ं) सुहवोन एधि स्वाहा ॥ इदमग्निवरुणाभ्यां न मम ॥ ॐ अ
याश्चाग्ने इत्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः॥
ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया असि ॥ अयानो यज्ञं वहास्यया
नो धेहि भेषज(ं) स्वाहा ॥ इदमग्नये न मम ॥ ॐ येनेशतमिति मन्त्रस्य वामदेव
ऋषिस्त्रिष्टुप्छन्दो वरुणसवितृविष्णुविश्वेमरुतः स्वर्का देवता आज्य होमे विनि
योगः ॥ ॐ यते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्नो अद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप. सवितोन विष्णुर्विश्वेमुञ्चन्तु मरुतः स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे वि
२५ श्वेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम॥ ॐ उदुत्तममिति शुनःशेप ऋषिस्त्रिष्टुप्छन्दो व
रुणो देवता आज्यहोमे विनियोगः॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्य
मꣳ श्रथाय॥ अथा वयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा॥ इदं वरु
णाय न मम॥ ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता
आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम॥ ॐ अग्नये
स्विष्टकृत इति प्रजापतिऋषिर्गायत्रीछन्दोऽग्निर्देवता स्विष्टकृद्धोमे विनियोगः॥ रामः
२५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥ संस्रवं प्राश्य आचम्य पवित्रा
भ्यां मुखं मार्जयित्वा पवित्रे अग्नौ क्षिपेत् ॥ ततः पूर्णपात्रमादाय कुशादीन्यादाय॥
अद्येहाऽमुकगोत्रोऽमुकशर्माऽहं मम अमुकनाम्नो ब्रह्मचारिणो वेदारम्भाङ्गहोमकर्म
णि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं वराटुल्लपूर्णपात्रं प्रजापतिदैवतं अमु
कगोत्रायाऽमुकशर्मणे ब्रह्मणे तुभ्यमहं सम्प्रददे ॥ इति दद्यात् ॥ ब्रह्मा च स्वस्तीति ब्रू
यात् ॥ ततः सुमित्रियादुर्मित्रिया इति मन्त्रयोः प्रजापतिर्ऋषिर्यजुरापो देवता प्रणी
ताविमोके विनियोगः ॥ ॐ सुमित्रियान आप ओषधयः सन्तु ॥ इति प्रणीताजलेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिरोऽभिषिच्य, ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः॥ इति प्रणी
तापात्रं सावशिष्टजलं ऐशान्यां न्युब्जीकुर्यात्॥ तत आस्तरणक्रमेणक्रमेण बर्हिरु
त्थाप्य ॐ देवागातु इत्यस्य मनसस्पतिऋषिर्विराट्छन्दो वातो देवता बर्हिर्होमे वि
नियोगः॥ ॐ देवागातुविदो गातुं वित्वा गातुमित॥ मनसस्पत इमन्देवयज्ञꣳ स्वाहा
वातेधाः स्वाहा॥ इदं प्रजापतये न मम॥ इति मन्त्रेण हस्तेन जुहुयात्॥ ततः गणेशं
सरस्वतीं लक्ष्मीं नारायणं वेदपुस्तकं संपूज्य ब्रह्मचारी उत्ताने वाममणिबन्धे उत्ता
ने दक्षिणमणिबन्धं निधाय पूर्वं स्वकर्णौ स्पृष्ट्वा उत्तानेन पद्माकारेण करेण, दक्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णेन दक्षिणं वामेन वामं गुरोश्चरणं स्पृशन् अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माऽ
हं भो गुरो अभिवादये ॥ गुरुश्च ॥ आयुष्मान्भव सौम्य अमुकशर्मन् २ इति प्लु
तान्तमाशिषं दद्यात् ॥ ततः प्रत्यङ्मुखायोपविष्टाय अधीष्व भो ॥ इत्युक्ताय ब्र
ह्मचारिणे प्रणवव्याहृतिपूर्वां सावित्रीं पाठयित्वा वेदारम्भं कारयेत् ॥ तद्यथा ॥
हरिः ॐ ३ ॥ ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि ॥ धियो यो नः प्र
चोदयात् ॥ ॐ समिधाग्निन्दुवस्यत घृतैर्बोधयतातिथिम् ॥ आस्मिन्हव्या जुहो
तन ॥ सुसमिद्धाय शोचिषे ॥ इषे त्वोर्ज्जे त्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्ठतमाय कर्म्मणे ऽ आप्यायद्ध्वमघ्न्या ऽ इन्द्राय भागं प्रजावतीरनमीवा ऽ अयक्ष्मा
मावस्तेन ऽ ईशतमाघशर्ठ॰सोद्ध्रुवा ऽ अस्मिन्गोपतौ स्यातबह्वी र्य्यजमानस्य पशू
न्पाहि ॥ वसोः पवित्रम् ॥ ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ॥ होतारं रत्न
धातमम् ॥ ॐ अग्न आयाहि वीतये गृणानो हव्यदातये ॥ निहोता सत्सि बर्हिषि ॥
ॐ शन्नो देवीरभिष्टय ऽ आपो भवन्तु पीतये ॥ शंयोरभिस्रवन्तु नः ॥ अथातो धीन्या
धीन्या निराकरणम् ॥ प्रतीकं मे विचक्षणं जिह्वा मे मधु यद्वचः ॥ कर्णाभ्यां भूरि
शुश्रुवे मा त्वर्ठ॰ हार्षीः श्रुतं मयि ॥ ब्रह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्मकोशोऽसि सवित्रसि शान्तिरस्य निराकरणमसि ब्रह्मकोशं मे विश ॥ वाचा त्वापिद
धामीति स्वरकरणकण्ठोरसदन्तोष्ठ्य मेधामाधुर्यग्रहणधारणोच्चारणशक्तिर्मयि
भवतु ॥ आप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशो बलम् ॥ यन्मे श्रुतं अधी
तं तन्मे मनसि तिष्ठतु तिष्ठतु ॥ इति ॥ ततः ॐ स्वस्ति इत्युक्त्वा गुरुं प्रणम्य फल
पुष्पसमन्वितब्रह्मचारिकरस्पृष्टस्रुवस्थघृतेन ॥ ॐ मूर्धानमित्यस्य भरद्वाजऋ
षिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णाहुतिहोमे विनियोगः ॥ ॐ मूर्धानन्दिवो अरतिं
पृथिव्या वैश्वानरमृत आजातमग्निम् ॥ कविꣳ सम्राजमतिथिञ्जनानामासन्नापा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वं जनयन्तदेवाः स्वाहा ॥ इदमग्नये न मम ॥ इति पूर्णाहुतिञ्जुहुयात् ॥ ततो ब्रह्मचा
री स्रुवेणानीतं भस्म दक्षिणकरानामिकया गृहीत्वा ॐ त्र्यायुषमिति मन्त्रस्य ना
रायण ऋषिरुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः ॥ ॐ त्र्या
युषं जमदग्नेरिति ललाटे ॥ ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायाम् ॥ ॐ यद्दे
वेषु त्र्यायुषम् इति दक्षस्कन्धे ॥ ॐ तन्नो अस्तु त्र्यायुषम् इति हृदि धारयेत् ॥
अथ शक्तो सत्यां गोदानं कुर्यात् ॥ गां तन्निष्क्रयद्रव्यं वा सम्पूज्य विप्रं च सम्पू
ज्य अद्येह अमुकगोत्रोऽमुकप्रवरोऽमुकनाम्नो ब्रह्मचारिणो ममकृतस्यास्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदारम्भकर्म्मणः प्रतिष्ठासाङ्गतासिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं दीयमानामिमां सुपूजि
तां गां रुद्रदेवकां तत्प्रत्याम्नायीभूतं रौप्यखण्डं चन्द्रदैवतं वा यथानामगोत्रायेत्
यादि ॥ कपिले सर्वदेवानामित्यादिना सम्प्रार्थ्य दानप्रतिष्ठां कुर्यात् ॥ अद्यकृ
तैतत्सुपूजितगोदानकर्म्मणः साङ्गफलप्राप्त्यर्थं गोप्रत्याम्नायीभूतरौप्यखण्ड
दानकर्म्मणः साङ्गफलप्राप्त्यर्थं वा माषं श्रीसूर्यदैवतं यथानामगोत्रायेत्यादि
इति वेदारम्भः ॥ ॥ अथ समावर्त्तनम् ॥ ॥ वेदादिसमाप्तौ नमेण ब्रह्मचा
रिणा यथाशक्ति दक्षिणां दत्वा भोगुरो स्नास्यामि इत्युक्ते स्नाहि इति गुरु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप. णोक्ते बहिःशालायां हस्तमात्रां चतुरङ्गुलोच्छ्रितां प्रागुदक्प्रवणां मृत्तिकादिभिर्वे
२९ दीं निर्माय तत्राऽङ्गुष्ठकनिष्ठिकाभ्यां गृहीतैस्त्रिभिर्दर्भैः स्थण्डिलोपरितः पांसून्पू
र्ववत्त्रि[illegible]रपसार्य दर्भानैशान्यां क्षिप्त्वा गोमयोदकेन उपलिप्य खादिरेण स्रुवे
ण स्फ्येन कुशमूलेन वा प्रादेशदीर्घाः स्थण्डिलप्रमाणाःप्रागग्रा उदक्संस्थास्ति
स्रो रेखाः कृत्वा अङ्गुष्ठकनिष्ठाभ्यां प्रतिरेखं यथोल्लेखं पांसूनुद्धृत्योर्ध्वं क्षिप्त्वा
उदकेन स्थण्डिलं ब्युब्जपाणिनाऽभिषिच्य कांस्यपात्रेनिहितं तेनैवपिहितं ए
जपुत्रनामानामग्निं स्थण्डिलादाग्नेयभागे निधाय क्रव्यादांशं नैर्ऋत्यां क्षिपे रामः
२९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्॥ स्थण्डिले स्वाभिमुखमग्निं स्थापयित्वा अग्न्यानयनपात्रे साक्षतमुदकं क्षि
पेत्॥ ततो गुरुः अग्नेर्दक्षिणस्यां दिशि स्थापिते पीठासने प्रागग्रान्षड् दर्भा
न्निधाय अग्नेरुत्तरस्थितं प्राङ्मुखं ब्राह्मणं चन्दनाक्षतादिभिः संपूज्य अद्येह
ऽमुकगोत्रोऽमुकशर्माहं मम अमुकनाम्नो ब्रह्मचारिणः समावर्त्तनहोमकर्म
णि कृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुं अमुकगोत्राऽमुकशर्मन् त्वं मे ब्रह्मा भव
ब्रह्मा च भवानीत्युक्त्वा अग्नेः पूर्वेणागत्य पूर्वस्थापिते [आसने] अग्न्यभिमुख उपवि
शेत्॥ ततो वितस्तिमात्रां भुवं विहाय अग्नेर्वायव्ये उत्तरे च प्रागग्रैः कुशैरास्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्वयं कल्पयित्वा प्रणीतापात्रं दक्षहस्तेन वामहस्ते पूर्वाग्रं निधाय दक्षहस्तोद्धृतोदके
न आत्माभिमुखं पूरयित्वा वायव्यासने निधाय दक्षहस्तोऽनामिकयाऽऽलभ्य उ
त्तरासने निदध्यात्॥ बर्हिर्मुष्टिमादाय तच्चतुर्थांशैराग्नेयादीशानान्तमुत्तराग्रम्
॥ पुनः ब्रह्मणोऽग्निपर्यन्तं पूर्वाग्रम्॥ नैर्ऋत्याद्वायव्यान्तमुत्तराग्रम्॥ अग्नितः
प्रणीतापर्यन्तं पूर्वाग्रम्॥ परिस्तरणं कुर्यात्॥ अथ उदगग्राः प्राक्संस्था उ
दक्संस्थाः पदार्थाः स्थाप्याः॥ पवित्रच्छेदनार्थं कुशपत्रत्रयम्॥ पवित्रे साग्रे
नन्तर्गर्भे कुशपत्रे॥ प्रोक्षणीपात्रम्॥ आज्यस्थाली॥ सम्मार्जनकुशास्त्रयः सा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्राः॥ उपयमनकुशास्त्रयोदश॥ समिधस्त्रिस्त्रः प्रादेशमात्राः पालाश्यः॥ स्रुवः॥
गव्यमाज्यम्॥ पूर्णपात्रम्॥ समिन्धनकाष्ठार्थानि दश॥ समिधस्त्रिस्त्रः पाला
श्यः॥ पर्युक्षणार्थमुदकम्॥ हरितकुशान्॥ अष्टौ उदकुम्भान्॥ द्वादशाङ्गुल
मौदुम्बरदन्तकाष्ठम्॥ दधि॥ नापितम्॥ स्नानार्थमुदकुम्भम्॥ उद्वर्तनद्रव्यम्॥
चन्दनम्॥ अहतवाससी॥ यज्ञोपवीते॥ पुष्पमाल्यादीनि॥ उष्णीषम्॥ कुण्डले॥
कज्जलम्॥ आदर्शम्॥ नूतनं छत्रम्॥ उपानहो॥ वेणुदण्डम्॥ उपकल्प्य त
त आसादिते कुशपत्रे गृहीत्वा अग्रतः प्रादेशमात्रं विहाय तयोरुपरि त्रीणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप. कुशतरुणानि निर्यङ्निधाय पवित्रमूलेन पवित्रे प्रदक्षिणमावेष्ट्य त्रयाणां मूलाग्रा
३१ णि द्वयोर्मूलानि च दक्षिणहस्तेन पवित्रे वामहस्तेन परिगृह्य छित्वा द्वयोर्मूलं त्री
णि चोत्तरः क्षिपेत् ॥ प्रोक्षणीपात्रं प्रणीताया उत्तरतो निधाय प्रणीतोदकं सप
वित्रहस्तेन त्रिर्निक्षिप्य तदुदकं पवित्राभ्यां प्रादेशमात्रमूर्ध्वं क्षिप्त्वा पवित्रे प्रो
क्षणीपात्रे निधाय प्रोक्षणीपात्रं दक्षहस्तेन वामहस्ते निधाय दक्षिणहस्ताऽ
नामिकाङ्गुष्ठाभ्यां त्रिरूर्ध्वोर्ध्वं क्षिप्त्वा प्रणीतोदकेन प्रोक्षेत् ॥ प्रोक्षण्युदके रामः
न स्रुवादीनि पात्राण्युत्तानानि कृत्वा एकैकशस्त्रिः प्रोक्ष्य असंचरे प्रणीताग्न्यो ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्मध्ये निदध्यात्॥ ततः आज्यस्थालीमग्नावारोप्य ज्वलदुल्मुकं आज्यस्योपरि
समन्तादीशानीमारभ्य प्रदक्षिणं भ्रामयित्वा अग्नौ प्रक्षिप्य उदकं स्पृष्ट्वा इत
रथा हस्तमावर्तयेत्॥ गुरुर्वामहस्तेन दक्षहस्ते निधाय पूर्वाग्रमधोबिलं स्रुवम
ग्नौ तापयित्वा वामे पाणावुत्तानबिलं निधाय दक्षहस्तधृतमध्यान्तां सम्मार्जन
कुशानामग्रैर्मूलतोऽग्रपर्यन्तं मूलैरग्रतोऽग्रपर्यन्तं सम्मृज्य सम्मार्जनकुशानुत्त
रतो निरस्य प्रणीतोदकेन स्रुवं पाणिनाऽभ्युक्ष्य पूर्ववत्तापयित्वा उदकं स्पृष्ट्वा दक्षि
णतः स्वसमीपे निदध्यात्॥ आज्यमुत्थाप्य प्रथमतोऽग्नेरुत्तरतः प्रोक्षणीपश्चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप. स्थापयित्वा ततोग्नेः पश्चादानीय पवित्राभ्यां किञ्चिदाज्यं प्रादेशमात्रं ऊर्ध्वं क्षिप्त्वा
३२ आज्यमवलोक्य सत्यपद्रव्ये तन्निरस्य प्रोक्षणीश्चाज्यं च पूर्ववदुत्पूय प्रोक्षणी
षु पवित्रे निदध्यात् ॥ उपयमनकुशान्दक्षिणपाणिना वामपाणौ निधाय तिस्रः
समिध आदाय उत्थायाऽग्नौ प्रागग्राः प्रक्षिप्य दक्षचुलुकगृहीतेन सपवित्रेणाऽ
शेषेण प्रोक्षण्युदकेन ईशानाद्युदक्पर्यन्तमग्निं परिषिच्य हस्तमितरथावर्त्य प
वित्रे प्रणीतासु निदध्यात् ॥ ततः ब्रह्मणा वामपाणौ कुशेनाऽन्वारब्धः पाणिना
दक्षजानुः सोपयमनकुशं वामहस्तं हृदि निधाय उत्तानेन दक्षिणहस्तेन शंख रामः
३२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुद्रया मध्यमूलयोर्धृतेन स्रुवेणाज्येन ॐ प्रजापतये इति प्रजापतिऋषिस्त्रिष्टु
प्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा इदं प्रजापत
ये न मम॥ सर्वत्र त्यागान्ते द्रव्यप्रक्षेपः॥ इति मनसा अग्नेरुत्तरभागे प्राञ्चमृजु
दीर्घसन्ततधारं पूर्वाघारमाघारयति॥ ॐ इन्द्रायेति मन्त्रस्य प्रजापतिऋषिस्त्रि
ष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम
अग्नेर्दक्षिणभागे प्राञ्चं० इत्याघारौ॥ ॐ अग्नये इति. प्रजापतिऋषिस्त्रिष्टुप्छन्दो
ऽग्निर्देवता आज्यहोमे विनियोगः॥ ॐ अग्नये स्वाहा इदमग्नये न मम॥ अग्नेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समिद्धप्रदेशे ॐ सोमायेति प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे वि
नियोगः॥ ॐ सोमाय स्वाहा इदं सोमाय न मम॥ एताबाज्यभागौ॥ ततो ब्रह्मणा
न्वारब्धः॥ ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय न मम॥ ॐ वायवे स्वाहा इ
दं वायवे न मम॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम॥ ॐ छन्दोभ्यः स्वाहा इ
दं छन्दोभ्यो न मम॥ ॐ पृथिव्यै स्वाहा इदं पृथिव्यै न मम॥ ॐ अग्नये स्वाहा
इदमग्नये न मम॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम॥ ॐ छन्दोभ्यः स्वाहा इदं
छन्दोभ्यो न मम॥ ॐ दिवे स्वाहा इदं दिवे न मम॥ ॐ सूर्याय स्वाहा इदं सूर्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

य न मम॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो
न मम॥ ॐ दिग्भ्यः स्वाहा इदं दिग्भ्यो न मम॥ ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे
न मम॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो
न मम॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये भ मम॥ इति मनसा॥ ॐ देवेभ्यः
स्वाहा इदं देवेभ्यो न मम॥ ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो न मम॥ ॐ श्रद्धायै
स्वाहा इदं श्रद्धायै न मम॥ ॐ मेधायै स्वाहा इदं मेधायै न मम॥ ॐ सदसस्पत
ये स्वाहा इदं सदसस्पतये न मम॥ ॐ अनुमतये स्वाहा इदं अनुमतये न मम॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ ३४ ततो ब्रह्मणाऽन्वारब्धः ॐ भूर्भुवः स्वरित्यस्य प्रजापतिऋषिर्गायत्र्युष्णिगनुष्टुभश्छ
न्दांसि अग्निवायुसूर्या देवता आज्यहोमे विनियोगः॥ ॐ भूः स्वाहा इदमग्नये न
मम॥ ॐ भुवः स्वाहा इदं वायवे न मम॥ ॐ स्वः स्वाहा इदं सूर्याय न मम॥ ॐ त्वन्नो
अग्न इत्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः
ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः॥ यजिष्ठो वह्नितमः शो
शुचानो विश्वा द्वेषाᳬसि प्रमुमुग्ध्यस्मत्स्वाहा॥ इदमग्निवरुणाभ्यां न मम॥ ॐ
सत्वन्न इति वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनियोगः रामः ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ॐ सत्वन्नो अग्नेवमो भवोतीनेदिष्ठो अस्या उषसो व्युष्टौ ॥ अवयक्ष्वनो वरुण८ं
रराणोवीहिमृडीक८ं सुहवो न एधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥ ॐ अ
याश्चाग्न इत्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः ॥
ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमया असि ॥ अयानो यज्ञं वहास्यया
नोधेहि भेषज७ स्वाहा ॥ इदमग्नये न मम ॥ ॐ येनेशतमितिवामदेवऋषिस्त्रि
ष्टुप्छन्दो वरुणसवितृविष्णुविश्वेमरुत्स्वर्का देवता आज्यहोमे विनियोगः॥ ॐ
येतेशतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्नो अद्यसवितोत

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप. विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो
३५ मरुद्भ्यः स्वर्केभ्यः ॥ ॐ उदुत्तमिमिति शुनःशेफऋषिस्त्रिष्टुप्छन्दो वरुणो देवता आ
ज्यहोमे विनियोगः ॥ ॐ उदुत्तमं वरुण॰मस्मदवाधमं विमध्यमꣳ श्रथाय ॥ अथा पाश
वयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा ॥ इदं वरुणाय न मम ॥ ॐ प्रजा
पतये इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः ॥ ॐ
प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ॐ अग्नय इत्यस्य प्रजापतिऋषिर्गा
यत्रीछन्दोऽग्निर्देवता स्विष्टकृद्धोमे विनियोगः ॥ ॐ अग्नये स्विष्टकृते स्वाहा ॥ रामः
३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदमग्नये स्विष्टकृते न मम ॥ ततः संस्रवं प्राश्य आचम्य पवित्राभ्यां मुखं मार्जयि
त्वा पवित्रे अग्नौ क्षिपेत् ॥ ततः पूर्णपात्रमादाय कुशादीन्यादाय अद्येहाऽमु
कगोत्रोऽमुकशर्माहं मम अमुकनाम्नः ब्रह्मचारिणः समावर्त्तनहोमकर्मणि कृ
ताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं तण्डुलपूर्णपात्रं प्रजापतिदैवतं अमु
कगोत्रायाऽमुकशर्मणे ब्रह्मणे तुभ्यमहं सम्प्रददे ॥ इति दद्यात् ॥ ब्रह्मा च स्व
स्ति इति ब्रूयात् ॥ ॐ सुमित्रिया दुर्मित्रिया इति द्वयोः प्रजापतिऋषिर्यजुरापो
देवता प्रणीताविमोके विनियोगः ॥ ॐ सुमित्रियान आप ओषधयः सन्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रणीताजलेन शिरोऽभिषिच्य ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयं द्वि
ष्मः ॥ इति प्रणीतापात्रं सावशिष्टजलमैशान्यां न्युब्जीकुर्यात् ॥ आस्तरणक्रमेण ब
र्हिरुत्थाप्य ॐ देवा गातु विदस्य मनसस्पतिऋषिर्विराट्छन्दो वातो देवता बर्हि
र्होमे विनियोगः ॥ ॐ देवा गातुविदो गातुं वित्वा गातुमित ॥ मनसस्पत इमन्देव य
ज्ञ७ स्वाहा वातेधाः स्वाहा ॥ इति हस्तेन बर्हिर्जुहुयात् ॥ इतः प्रभृतिषु ब्रह्मचारी क
र्त्ता ॥ ततो ब्रह्मचारी श्रोत्रसमावुद्धो करौ कृत्वाञ्जलिं विधाय अमुकगोत्रोऽमुक
प्रवरोऽमुकनामाऽहं भो वैश्वानर अभिवादये ॥ इति वैश्वानरमभिवाद्य अमुक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोत्रोऽमुकप्रवरः अमुकनामाहं भो वरुण अभिवादये ॥ इति वरुणमभिवादये
त्॥ उत्ताने वाममणिबन्धे उत्तानं दक्षिणमणिबन्धं निधाय पूर्वं स्वकर्णौ स्पृष्ट्वा
उत्तानेन पद्माकारेण करेण, दक्षिणेन दक्षिणं वामेन वामं गुरुचरणं स्पृशन् अ
मुकगोत्रोऽमुकप्रवरः अमुकनामाऽहं भो गुरो अभिवादये ॥ गुरुश्च आयुष्मान्
भव सौम्य अमुकशर्मन् ३॥ इत्याशिषं दद्यात् ॥ ततो ब्रह्मचारी अग्नेः पश्चादुप
विष्टो घृताक्तं शुष्कमनिषिद्धं काष्ठादीन्धनं पञ्चभिर्मन्त्रैः प्रतिमन्त्रमेकैकं पाणि
ना दक्षिणेनाग्नौ प्रक्षिपेत् ॥ ॐ अग्ने सुश्रव इत्यादीनां ब्रह्मऋषिर्यजुष्यग्निर्देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ता समिन्धने विनियोगः॥ ॐ अग्ने सुश्रवः सौश्रवसं मा कुरु ॥१॥ ॐ यथा त्वमग्ने सु
श्रवः सुश्रवा असि ॥२॥ ॐ एवं माꣳ सुश्रवः सौश्रवसं कुरु ॥३॥ ॐ यथा त्वमग्ने दे
वानां यज्ञस्य निधिपा असि ॥४॥ ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयास
म् ॥५॥ ततः सन्धुक्षितमग्निं दक्षहस्तस्थवारिणा प्रदक्षिणमीशानादीशानपर्य
न्तं पर्युक्ष्य तिस्रः समिध आदायोत्थाय ॐ अग्नये इत्यस्य प्रजापतिरृषिराकृ
तिश्छन्दः समिद्देवता समिधादाने विनियोगः॥ ॐ अग्नये समिधमहार्षं बृहते
जातवेदसे॥ यथा त्वमग्ने समिधा समिध्यस एवमहमाऽऽयुषा मेधया वर्चसा प्रज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या पशुभिर्ब्रह्मवर्चसेन समिन्धे॥ जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिरा
करिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयास७ स्वाहा॥ इत्येकां प्रागग्रां
समिधमग्नौ प्रक्षिप्य मन्त्रावृत्त्या द्वितीयां तृतीयां च प्रक्षिपेत्॥ तत उपवि
श्य पूर्ववत् ॐ अग्ने सुश्रव इत्यादीनां ब्रह्मा ऋषिर्यजूंष्यग्निर्देवता समिन्धने
विनियोगः॥ ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु॥१॥ ॐ यथा त्वमग्ने सुश्रवः सु
श्रवा असि॥२॥ ॐ एवं मा७ सुश्रवः सौश्रवसं कुरु॥३॥ ॐ यथा त्वमग्ने देवा
नां यज्ञस्य निधिपा असि॥४॥ ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मू ॥ ततः दक्षहस्तस्थवारिणा प्रदक्षिणमीशानादीशानपर्यन्तं पर्युक्ष्य हस्तौ तूष्णी
मग्नौ तापयित्वा सप्तभिर्मन्त्रैः प्रतिमन्त्रं ललाटाच्चिबुकपर्यन्तं सन्तप्तहस्ताभ्यां विमृ
ज्यात् ॥ ॐ तनूपा इत्यादीनां बृहद्देवता ऋषयो यजूंष्यग्निर्देवता मुखविमर्शने विनि
योगः ॥ ॐ तनूपा अग्नेसि तन्वं मे पाहि ॥१॥ ॐ आयुर्दा अग्ने स्यायुर्मे देहि ॥२॥ ॐ
वर्चोदा अग्नेसि वर्चो मे देहि ॥३॥ ॐ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥४॥ ॐ मे
धां मे देवः सविता आदधातु ॥५॥ ॐ मेधां देवी सरस्वती आदधातु ॥६॥ ॐ मेधा
मश्विनौ देवावाधत्तां पुष्करस्रजौ ॥७॥ आचारतः तत्तदङ्गानि हस्ताग्रेण स्पृशन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्रान्पठेत्॥ ॐ अङ्गानि चम इत्यादीनां प्रजापतिऋषिर्यजूंषि लिङ्गोक्ता देवता
अङ्गाप्यायने विनियोगः॥ ॐ अङ्गानि चम आप्यायन्ताम्॥ शिरःप्रभृति पादान्तं
स्पृशेत्॥ ॐ वाक्चम आप्यायताम्॥ पञ्चाङ्गुलीभिर्मुखं स्पृष्ट्वा, ॐ प्राणश्च
म आप्यायताम्॥ नासिकारन्ध्रे अङ्गुष्ठतर्जनीभ्यां युगपत्स्पृष्ट्वा; ॐ चक्षुश्चम
आप्यायताम्॥ अनामिकाङ्गुष्ठाभ्यां दक्षिणं चक्षुः स्पृशेत्॥ मन्त्रावृत्या वामं च
ॐ श्रोत्रं चम आप्यायताम्॥ दक्षिणश्रोत्रं चक्षुर्वत्स्पृशेत्॥ एवं मन्त्रावृत्या वा
मम्॥ ॐ यशोबलं चम आप्यायताम्॥ इत्यस्य जपमात्रम्॥ ॐ आयुषमित्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नानोल्लासे- ८ कलशे नत्वायामि वरुणं १ ब्राह्मीम् १ इन्द्रम् १ ॥ नमोस्तु स॰ नागान् २ माहेश्वरीम् २ अग्निम् २॥ अनाघात् अप्सरसः ३ कौमारीम् ३ यमम् ३॥ ब्रह्मज॰ कुमारम् ४ वैष्णवीम् ४ निर्ऋतिम् ४॥ विश्वेश॰ वामनम् ५ वाराहीम् ५ वरुणम् ५॥ मानस्तोके॰ रुद्रम् ६ ऐन्द्रीम् ६ वायुम् ६॥ सहस्र॰ अष्टचिरञ्जीविनः ७ चामुण्डाम् ७

उप॰ ३९ स्य नारायण ऋषिरुष्णिक्छन्दः आयुर्देवता भस्मना तिलककरणे विनियोगः॥ ॐ

त्र्यायुषं जमदग्नेः इति ललाटे॥ ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायाम्॥ ॐ य

द्देवेषु त्र्यायुषम् इति दक्षिणस्कन्धे॥ ॐ तन्नो अस्तु त्र्यायुषम् इति हृदि धारयेत्

अग्नेरुत्तरभागे उत्तरवृत्त्या स्थापितानां वस्त्रादिवेष्टितानां आम्रादिपल्लवयुत

जलपूर्णानां कलशानां पूर्वभागे आस्तृत पूर्वाग्रहरितकुशेषु दक्षिणकलशस

मीपे उदङ्मुख ऊर्ध्वी भूय ॐ ये पवित्रमिति मन्त्रस्य प्रजापतिर्ऋषिर्यजुरापो देवता उद ऋषि रामः ३९

कग्रहणे विनियोगः॥ ॐ येष्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोह

सोमम् ७॥ श्रीश्चते॰ लक्ष्मीम् ८ महालक्ष्मीम् ८ ईशानम् ८ ततोषध्यादीनि रत्नानि च क्षिपेत्॥ पूर्णाभिषेककलशौषधीः ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ःस्वर्लुविकजुस्तनूदुषुरिन्द्रियहातान्विजहामि योरोचनस्तमिह गृह्णामि ।। इति मन्त्रेण
दक्षहस्तेन प्रथमकुम्भाज्जलं गृहीत्वा ॐ तेनमामित्यस्य प्रजापतिऋषिर्यजुरापो
देवता अभिषेचने विनियोगः ।। ॐ तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्म
वर्चसाय ।। इति मन्त्रेण तेनजलेन शिरोऽभिषिञ्चेत् ।। ततो द्वितीयकलशसमीपं ग
त्वा ॐ येप्स्वन्तरिति मन्त्रेण जलं गृहीत्वा ॐ येन श्रियैमित्यस्य प्रजापतिऋषि
र्यजुरापो देवता अभिषेचने विनियोगः ।। ॐ येन श्रियमकृणुतां येनावमृशतां७
सुराम् ।। येनाक्ष्यावभ्यषिञ्चतां यद्वा तदश्विना यशः ।। इति मन्त्रेण तेन जलेन शि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोऽभिषिञ्चेत् ॥ ततस्तृतीयकलशजलम् ॐ पवन्तरिति मन्त्रेण गृहीत्वा ॐ आपो
हिष्ठेत्यादीनां सिन्धुद्वीपऋषिर्गायत्रीछन्द आपो देवता अभिषेचने विनियोगः
ॐ आपोहिष्ठा मयोभुवस्तान ऊर्ज्जे दधातन ॥ महेरणाय चक्षसे ॥ इति मन्त्रेण ते
न जलेन शिरोऽभिषिञ्चेत् ॥ ततश्चतुर्थकलशजलम् ॐ येपवन्तरिति मन्त्रेण गृ
हीत्वा ॐ योवः शिवतमोरसस्तस्य भाजयते हनः ॥ उशतीरिव मातरः ॥ इति म
न्त्रेण तेन जलेन शिरोऽभिषिञ्चेत् ॥ ततः पञ्चमकलशजलं ॐ येपवन्तरिति
मन्त्रेण गृहीत्वा ॐ तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ ॥ आपो जन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा चतः॥ इति मन्त्रेण तेन जलेन शिरोऽभिषिञ्चेत्॥ ततः षष्ठकलशजलं ॐ ये
प्स्वन्तरिति मन्त्रेण गृहीत्वा तूष्णीं शिरोऽभिषिञ्चेत्॥ ततः सप्तमकलशजलं ॐ
येप्स्वन्तरिति मन्त्रेण गृहीत्वा तूष्णीं शिरोऽभिषिञ्चेत्॥ ततोऽष्टमकलशजलं
येप्स्वन्तरिति मन्त्रेण गृहीत्वा तूष्णीं शिरोऽभिषिञ्चेत्॥ ततो मेखलाम् ॐ उ
दुत्तममिति मन्त्रस्य शुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता मेखलोन्मोके
विनियोगः॥ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यम ७ श्रथाय॥ अ
था वयमादित्यव्रते तवानागसो अदितये स्याम॥ इति मन्त्रेण शिरो मार्गेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निःसार्य भूमौ निक्षिप्य दण्डम् अजिनं च तूष्णीं उत्तराग्रं निधाय अन्यद्वा
उप. ४१ सः परिधाय ॐ उद्यदिति मन्त्रस्य प्रजापतिरृषिरतिशक्करी छन्द आदित्यो दे
वता उपस्थाने विनियोगः॥ ॐ उद्यन्भ्राजभृष्णुरिन्द्रोमरुद्भिरस्थात्प्रातर्यावभिर
स्थाद्दशसनिरसि दशसनिं मार्वाऽऽविदन्मागमय॥ उद्यन्भ्राजभृष्णुरिन्द्रोमरुद्भि
रस्थाद्दिवायावभिरस्थाच्छतसनिरसि शतसनिं माकुर्वाऽऽविदन्मागमय॥ उद्य
न्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा
कुर्वाऽऽविदन्मागमय॥ इति मन्त्रेण सूर्यमुपस्थाय ततो दक्षिणहस्तमध्यगत राम: ४१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोमतीर्थेन दधि तिलान् वा प्राश्य केशान्तरवांश्च उदकसंस्थो वापयित्वा
स्नात्वा आचम्य कनिष्ठाग्रसमस्थूलप्रक्षालितद्वादशाङ्गुलदीर्घौदुम्बरका
ष्ठेन दन्तान् ॐ अन्नाद्याय व्यूहध्वमित्यस्य आथर्वणऋषिरनुष्टुप्छन्दः सोमो देवता
दन्तधावने विनियोगः॥ ॐ अन्नाद्याय व्यूहध्वं सोमो राजाय मागमत्॥ स
मे मुखं प्रमार्क्ष्यते यशसा च भगेन च॥ इति मन्त्रेण धावयेत्॥ तत्काष्ठं प्रक्षा
ल्य प्रागुदग्वा त्यजेत्॥ द्वादश गण्डूषैर्मुखं प्रक्षाल्य सुगन्धिवस्तुमिश्रितस
र्षपादिचूर्णरूपोद्वर्तनादिना शरीरमुद्वर्त्य पुनर्मलापकर्षस्नानं कृत्वा प्रोक्ष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप.
५२

आचम्य आर्द्रवासा एव हस्ताभ्यां चन्दनाद्यनुलेपं गृहीत्वा ॐ प्राणापानाविन्य
स्य प्रजापतिऋषिर्यजुः प्राणापानौ देवते चन्दनोपग्रहणे विनियोगः॥ ॐ प्रा
णापानौ मे तर्पयत॥ ॐ चक्षुर्मे तर्पयत॥ ॐ श्रोत्रं मे तर्पयत॥ इति मन्त्रेण
नासिकाविले मुखं च स्पृष्ट्वा कस्मिंश्चित्पात्रे हस्तौ प्रक्षाल्य अपसव्यं विधाय
हस्तप्रक्षालनोदकमाञ्जलिनाऽऽदाय दक्षिणाऽभिमुखो पितृतीर्थेन दक्षिणादि
शि भूमौ ॐ पितर इत्यस्य प्रजापतिऋषिर्यजुः पितरो देवता पाण्यवनेजन-
निषेके विनियोगः॥ ॐ पितरः शुन्धध्वम् इति मन्त्रेण निषिञ्चेत्॥ ततः सर्वं

राम:
५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्वा उदकं स्पृशेत् ॥ चन्दनादि गृहीत्वा अनुलिप्य सुचक्षा इति मन्त्रस्य प्रजाप-
तिऋषिर्यजुराशीर्देवता जपे विनियोगः ॥ ॐ सुचक्षा अहमक्षीभ्यां भूयासᳬं सुव
र्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम् ॥ इति मन्त्रं जपेत् ॥ ततो रजकधौतं श्वेतं प
रिधानीयम् ॥ ॐ परिधास्ये इति मन्त्रस्य आलम्बायनऋषिः पङ्क्तिश्छन्दो वा
सो देवता वस्त्रपरिधाने विनियोगः ॥ ॐ परिधास्ये यशोधास्ये दीर्घायुत्वाय ज
रदष्टिरस्मि शतं च जीवामि शरदः पुरूची रायस्पोषमभि संव्ययिष्ये ॥ इति मन्त्रे
ण परिधाय द्विराचम्य यज्ञोपवीतं गृहीत्वा ॐ यज्ञोपवीतमित्यस्य परमेष्ठीऋ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप.
४३

त्रिष्टुप्छन्दो लिङ्गोक्ता देवता यज्ञोपवीतधारणे विनियोगः॥ ॐ यज्ञोपवीतं प
रमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्॥ आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं
बलमस्तु तेजः॥ ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि॥ इति म
न्त्रेण दक्षिणबाहुमुद्धृत्य वामस्कन्धे धारयेत्॥ आचम्य ततोऽरजकधौतमुत्तरीय
म्॥ ॐ यशसा मेत्यस्याथर्वणऋषिः पङ्क्तिश्छन्दो लिङ्गोक्ता देवता उत्तरीयवस्त्र
धारणे विनियोगः॥ ॐ यशसा माद्यावापृथिवी यशसेन्द्रा बृहस्पती॥ यशो भग
श्च माविदद्यशो मा प्रतिपद्यताम्॥ इति मन्त्रेण धारयित्वा द्विराचमेत्॥ ततो गुरु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रगा दत्तानि पुष्पमाल्यानि ॐ या आहरदिति मन्त्रस्य भरद्वाजऋषिरनुष्टुप्छ-
न्दः सुमनसो देवता पुष्पमाल्य ग्रहणे विनियोगः॥ ॐ या आहरज्जमदग्निः श्र
द्धायै मेधायै कामायेन्द्रियायता अहं प्रतिगृह्णामि यशसा च भगेन च इति म-
न्त्रेण प्रतिगृह्य ॐ यद्यश इति मन्त्रस्य भरद्वाजऋषिरनुष्टुप्छन्दः सुमनसो दे
वता पुष्पबन्धने विनियोगः॥ ॐ यद्यशोप्सरसामिन्द्रश्चकार विपुलं पृथु॥ तेन
सङ्ग्रथिताः सुमनस आबध्नामि यशोमयि॥ इति मन्त्रेण शिरसि बध्नीत॥ उष्णी
षं गृहीत्वा ॐ युवासु इति मन्त्रस्य विश्वामित्रऋषिस्त्रिष्टुप्छन्दो यूपो देवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप. शिरोवेष्टने विनियोगः॥ ॐ युवासुवासाः परिवीत आगात्स उश्रेया भवति जाय
४४ मानः॥ तन्धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः॥ इति मन्त्रेण शि
रो वेष्टयेत॥ कुण्डले गृहीत्वा ॐ अलङ्करणमित्यस्य भरद्वाजऋषिरुष्णिक्छ
न्दोऽलङ्करणं देवता अलङ्करणे विनियोगः॥ ॐ अलङ्करणमसि भूयोऽलङ्कर
णं भूयात्॥ इति मन्त्रेण दक्षिणकर्णे धारयेत्॥ मन्त्रावृत्या वामकर्णे च॥
अञ्जनं गृहीत्वा ॐ वृत्रस्येति मन्त्रस्य प्रजापतिऋषिर्गायत्री छन्दो, अञ्जनं
देवता चक्षुरञ्जने विनियोगः॥ ॐ वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे रामः
४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देहि ॥ इति मन्त्रेण वामनेत्रमञ्जयित्वा मन्त्रावृत्त्या दक्षिणनेत्रं चाञ्जयेत् ॥
ततः कञ्चुकादीनि परिधाय आचामेत् ॥ दर्पणं गृहीत्वा ॐ रोचिष्णुरिति म
न्त्रस्य प्रजापतिऋषिर्यजुरादर्शो देवता आदर्शप्रेक्षणे विनियोगः ॥ ॐ रो-
चिष्णुरसि ॥ इति मन्त्रेण मुखप्रभृति सर्वदेहं आदर्शे प्रेक्षेत ॥ ततो गुरुणा द
त्तं छत्रम् ॐ बृहस्पतेरित्यस्य गौतमऋषिर्बृहद्गायत्री छन्दश्छत्रं देवता छत्र
ग्रहणे विनियोगः ॥ ॐ बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो
मामन्तर्धेहि ॥ इति मन्त्रेण गृह्णीत ॥ तत उपानहौ ॥ ॐ प्रतिष्ठस्थ इत्यस्य वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्वामित्रऋषिर्विराट्छन्दो लिङ्गोक्ता देवता उपानत्परिधाने विनियोगः॥ ॐ
प्रतिष्ठस्थो विश्वतो मा पातम्॥ इति मन्त्रेण युगपत्परिदधाति॥ ततो वंशाद
राडम् ॐ विश्वाभ्य इत्यस्य याज्ञवल्क्यऋषिस्त्रिष्टुप्छन्दो दण्डो देवता दण्डो
ग्रहणे विनियोगः॥ ॐ विश्वाभ्यो माना ष्टाभ्यः परिपाहि सर्वतः॥ इति मन्त्रे
णादद्दीत॥ ततो रथमारुह्य पूर्वोत्तरं गच्छेत्॥ अत्रैव देशान्तरश्रवणमि-
त्याचारः॥ ततो मातुलादिर्मार्गे गत्वा तन्निवर्तयेत्॥ ततो गुरुः स्नानककर
स्पृष्टेन सफलघृतपूर्णस्रुवेण ॐ मूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्निर्दैवता पूर्णाहुतिहोमे विनियोगः॥ ॐ मूर्धानन्दिवोऽअरतिम्पृथिव्या वैश्वा
नरमृतऽआजातमग्निम्॥ कविꣳसम्राजमतिथिञ्जनानामासन्नापात्रंजनय
न्तदेवाः स्वाहा इदमग्नये न मम॥ इति मन्त्रेण पूर्णाहुतिं जुहुयात्॥ ततो गां त
न्मूल्योपकल्पितं द्रव्यं वा सम्पूज्य कुशादीन्यादाय ॐ अद्येहाऽमुकगोत्रोऽ
मुकप्रवरोऽमुकशर्माऽहं मम [illegible] समावर्त्तनकर्मणः साङ्गतासि
द्ध्ये इमां सुपूजितां गां रुद्रदैवताकां तन्मूल्याम्नायीभूतं द्रव्यं यथादैवतं अमुक
गोत्रायाऽमुकशर्मणे आचार्याय दातुमहमुत्सृजे॥ इति दत्वा ॐ कपिले सर्वदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वानां पूजनीयासि रोहिणी ॥ तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥ इति प्रार्थ्य
दानप्रतिष्ठां दद्यात् ॥ अद्य कृतैतद्गोदानकर्मणः "गोनिष्क्रयद्रव्यदानकर्मणो
वा" साङ्गफलप्राप्त्यर्थं नामस्वर्णं रजतस्वर्णं वा यथादैवतं अमुकगोत्रा-
यामुकशर्मणे आचार्याय तुभ्यमहं सम्प्रददे ॥ ततोऽग्निस्थापनोक्तहवना
दिपूर्णपात्रदानं पूर्णाहुतिहोमं गोदानं भूयसीदक्षिणादानं च कृत्वा ग्रहा
दीन्विसृजेत् ॥ कलशोदकेन यजमानादीनभिषेचयेत् ॥ ते च ब्राह्मणादाशी
र्गृहीत्वा तान्भोजयित्वा ससुहृत्का भुञ्जीरन् ॥ इति समावर्तनपद्धतिः ॥ ॥ रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप. ४७

देवकोत्थापनं तु षष्ठातिरिक्तसमे पञ्चसप्तदिने कुर्यात् ॥ आसने उपविश्या
ऽऽचम्य आवाहितदेवतान्पञ्चोपचारैः सम्पूज्य यान्तु मातृगणाः सर्वाः स्व
शक्त्या पूजिता मया ॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ इत्युक्त्वोत्था
प्य पुण्याहं वाचयेत् ॥ इति ॥ अथ त्रिरात्रव्रतम् ॥ तिस्रो रात्रीर्व्रतं चरेत् ॥
अमांससाश्यमृण्मयपायी स्त्रीशूद्रशवकृष्णशकुनिशुनां चादर्शनमसंभाषा
च ॥ शवशूद्रसूतकान्नानि नाद्यात् ॥ मूत्रपुरीषे ष्ठीवनं चातपेन कुर्यात् ॥ सूर्या
त्त्रात्मानं नान्तर्दधीत ॥ न तप्तेनोदककार्थान्कुर्वीत ॥ अवज्योत्यरात्रौ भोजनम् ॥ सत्यवदनं

रामः ४७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपनयनम् ।
वेदारम्भः ।
समावर्त्तनञ्च ।
पत्र.५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ १ श्रीगणेशायनमः॥ ॥अथोपनयनविधानम्॥ ॥उपनयनमुहूर्तात्पूर्वे
द्युः पिता बटुना सह कर्मस्थानमागत्य आचम्य कुशादीन्यादाय का
श्यपगोत्रस्य वर्मणो मम छत्रराजवीरविक्रमनाम्नः कुमा
रस्य उपनयनकर्तृत्वाधिकारसिद्ध्यर्थं द्वादशसहस्र
इति प्रतिज्ञाय गोत्रितयमूल्यं ब्राह्मणांश्च संपूज्य कुशादीन्या
दाय अद्येह काश्यपगोत्रस्य वर्मणो मम छत्रराजवीरवि राम॰
क्रमनाम्नः कुमारस्य उपनयनकर्तृत्वाधिकारसिद्ध्यर्थं गोत्रितयनि १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्क्रयीभूतं रजतं चन्द्रदैवतं काश्यपगोत्राय शर्मणे ब्राह्मणाय दा
स्ये तत्सन्नमम संप्रार्थयेत् ॥ कपिले सर्वदेवाना मित्यादि ॥ दानप्रति
ष्ठां कुर्यात् ॥ अद्यकृतैतद्गो प्रत्याम्नायी भूत रजत दानप्रतिष्ठार्थमिमां द
क्षिणां रौप्यं चन्द्रदैवतं काश्यपगोत्राय शर्मणे ब्राह्मणाय तुभ्य
महं संप्रददे ॥ पुनः कुशादीन्यादाय अद्येह काश्यपगोत्रस्य
शर्मणो मम छत्रराजवीरविक्रमनाम्नः कुमारस्य गायत्र्युपदेशाधि
कारसिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं द्वादशसहस्रं गायत्रीजपं ब्राह्मणाद्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ राकर्तुं नाना नाम गोत्राणां नामशर्मणो ब्राह्मणान् युष्मानहं वृणे ॥ वृताः स्म
२ इति प्रत्युक्तिः ॥ ततो ब्राह्मणान्वरयेत् ॥ ते च जपं कुर्युः ॥ ततः कुमारः कुशा
दीन्यादाय अद्येह काश्यपगोत्रस्य पूर्ण छत्रराजवीरविक्रमनाम्नः कुमारस्य मम
म कामचारकामभक्षदोषापनोदनद्वारा परमेश्वरप्रीत्यर्थं गोत्रितयरजत
दानप्रत्याम्नायेन कृच्छ्रत्रयमहं करिष्ये ॥ इति प्रतिज्ञाय देयद्रव्यं संपूज्य
कुशादीन्यादाय अद्येह काश्यपगोत्रस्य छत्रराजवीरविक्रमनाम्नः कुमा राम॰
रस्य मम कामचारकामवादकामभक्षदोषापनोदनद्वारा परमेश्वरप्रीत्य २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थं गोत्रिनयनिष्क्रयीभूतं रजतं चन्द्रदैवतं काश्यपगोत्राय ………… शर्मणे
ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति दत्वा सङ्कल्पार्थं दान प्रतिष्ठां कुर्यात् अद्य
कृतैतद्गोप्रत्याम्नायीभूत रजत दान प्रतिष्ठार्थमिमां दक्षिणां रजतं चन्द्रदैवतं
काश्यपगोत्राय ………… शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ ॥इति
प्रायश्चित्तविधिः ॥ ॥उपनयनमात्रकरणे तु ततः पिता कुशादीन्या
दाय अद्येह काश्यपगोत्रस्य ………… वर्मणो मम छत्रराजवीरविक्रम
नाम्नः कुमारस्य द्विजत्वसिद्ध्या वेदाध्ययनाधिकारसिद्ध्यर्थमुपनयनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ श्रौतस्मार्तक्रियानुष्ठानाधिकारसिद्धये वेदारम्भं गृहस्थाद्याश्रमप्राप्तिद्वा
२ रा परमेश्वरप्रीत्यर्थं समावर्तनं तत्रग्रहानुकूल्यसिद्ध्यर्थं ग्रहयज्ञं च श्वः
करिष्ये तदङ्गभूतपुण्याहवाचनं गणपतिपूजनं मातृकापूजनं वसोर्धारा
पूजनं नान्दीश्राद्धमग्रे करिष्ये ॥ इति प्रतिज्ञाय तानि क्रमेण कुर्यात् ॥ ततो
ऽपरदिने कृतनित्यक्रियो यजमानश्चन्दनाक्षतपुष्पपूगीफलवस्त्रद्रव्याण्या
दाय कुशादीन्यादाय अद्येह काश्यपगोत्रस्य वर्मणो मम रा॰म॰
छत्रराजवीरविक्रम नाम्नः कुमारस्य उपनयनवेदारम्भसमावर्तनेषु ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहानुकूल्यसिद्धिद्वारा परमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये तत्कर्मकर्तुं
अमुकगोत्रौ अमुकशर्माणौ ब्राह्मणौ आचार्यब्रह्मत्वेनाहं वृणे इत्या
चार्यब्रह्माणौ वृत्वा ग्रहयज्ञं समापयेत् ॥ ॥अथ उपनयनप्रयोगः॥
ततः वटोरुपनयनाङ्गं वपनं स्नानं कारयेत् । कुशादीन्यादाय अद्ये
ह काश्यपगोत्रस्य खगेन्द्रराज शर्मणो मम यजमानकुमारस्य छत्रराजवीर
विक्रमनाम्नः उपनयनं कर्तुं पक्वान्नादिभिस्त्रीन्ब्राह्मणान् कुमारं च भो भोजयिष्ये
जयेत् ॥ ततो वहिः शालायां परिष्कृतभूमौ वालुकामृत्तिकादिना हस्त ततः ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप. ४ मात्रं चतुरस्रं चतुरंगुलोच्छ्रितं प्रागुदक्प्रवणं स्थण्डिलं रचयेत् ॥ ततोऽङ्गुष्ठ
कनिष्ठाभ्यां गृहीतैस्त्रिभिर्दर्भैर्वेद्युपरितः पांसून्पूर्वतस्त्वपसार्य दर्भानै
शान्यां क्षिपेत् ॥ गोमयोदकेनोपलिप्य स्रुवमूलेन स्फ्येन कुशमूलेन वा
प्रादेशदीर्घा वेदिप्रमाणा वा प्रागग्रा उदक्संस्था स्तिस्रो रेखा उल्लिख्य
अनामिकाङ्गुष्ठाभ्यां प्रतिरेखं यथोल्लेखं पांसूनुद्धृत्यैशान्यां क्षिपेत् ॥
कुशपाणिना उदकेन वेदीमभिषिच्य कांस्यपात्रे निहितं तेनैव पिहि गमः
तमग्निं वेद्या आग्नेयभागे निधाय क्रव्यादांशं नैर्ऋत्यां दिशि क्षिपेत् ॥ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थण्डिले स्वाभिमुखं समुद्भवनामाग्निं स्थापयेत् ॥ अग्न्यानयनपा
त्रे साक्षतमुदकं क्षिपेत् ॥ ततः कुमारमाचार्यः शिष्यद्वाराग्नेः पश्चात्स्व
दक्षिणपार्श्वे उपस्थापयति ॥ ततः कुमारं बद्धाञ्जलिं संबोध्य ॐ ब्रह्मच
र्यमागाम् इति ब्रूहि ॥ इति आचार्यप्रैषः ॥ ॐ ब्रह्मचर्यमागाम् इति कु
मारो ब्रूयात् ॥ ॐ ब्रह्मचार्यसानि इति ब्रूहि इति आचार्यप्रैषः ॥ ॐ
ब्रह्मचार्यसानि इति कुमारो ब्रूयात् ॥ अथ माणवकमाचार्यः शाणं
धौतं परिधापयति ॥ आचार्यपठनीयमन्त्रः ॐ येनेन्द्रायेति मन्त्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ स्याङ्गिराऋषिर्बृहतीछन्दोबृहस्पतिर्देवतावासःपरिधापनेविनियोगः ॥
५ ॐयेनेन्द्रायबृहस्पतिर्वासःपर्यदधादमृतम् । तेनत्वापरिदधाम्यायुषेदी
र्घायुत्वायबलायवर्चसे । इतिमन्त्रंपठित्वा आचार्यःपरिधापयेत् । कु
मारोवस्त्रपरिधाननिमित्तंद्विराचमनंकुर्यात् । तत आचार्यस्त्रिगुणांमौ
ञ्जींमेखलां आदायकुमारस्यकट्यांप्रादक्षिण्येन द्विवारंवेष्टयित्वा
तृतीयवेष्टने कुमारप्रवरसंख्यान्ग्रन्थीन्कृत्वा तेनापि वेष्टयेत् । आचा राम॰
र्यः । ॐइयमितिमन्त्रस्यवामदेवऋषिस्त्रिष्टुप्छन्दोमेखलादेवतामेख ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लावन्धने विनियोगः ॥ ॐ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म
आगात् ॥ प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम्
इति पठेत् ॥ अथाचार्याय यज्ञोपवीताष्टकदानम् ॥ कुमारः शिखाबन्धन
माचमनं च कृत्वा तण्डुलपूरितेष्वष्टसु पात्रेषु फलं यज्ञोपवीतं निधाय
कुशादीन्यादाय अद्येह काश्यपगोत्रस्य छत्रराजवीरविक्रम नाम्नः, मम
द्विजाचारप्राप्त्यर्थं तण्डुलपूर्णपात्रस्थानि सफलानि यज्ञोपवीतानि ब्रह्म
दैवतानि नानानाम गोत्रेभ्यो नानानाम शर्मभ्यो ब्राह्मणेभ्यो दातुमह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप· मुत्सृजे ॥ इत्यष्टभ्यो ब्राह्मणेभ्यो दत्वा दक्षिणाद्रव्यमादाय अद्यकृतेन
६ यज्ञोपवीताष्टकदान प्रतिष्ठार्थं दक्षिणां रौप्यं चन्द्रदैवतं नानानामगोत्रे
भ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे इति दद्यात् ॥ ततः
गुरु यज्ञोपवीतमेकमादाय ॐ यज्ञोपवीतमित्यस्य परमेष्ठी ऋषिस्त्रिष्टु
प्छन्दो लिंगोक्ता देवता औ तस्मात्कर्मानुष्ठानसिद्ध्यर्थमुपवीतधारणे
विनियोगः ॥ ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ रामः
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतम ६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ॥ इति मन्त्रं पठितवतः कुमारस्य
दक्षिणबाहुमुद्धृत्य वामस्कन्धे निवेशयेत् ॥ कुमार आचमेत् ॥ ततो गु
२११ रुस्तूष्णीं दत्तं मृगीचर्म कुमारः ॐ मित्रस्येति मन्त्रस्य परमेष्ठी ऋषिस्त्रि
ष्टुप्छन्दो लिङ्गोक्तादेवता ऐणेयोत्तरीयधारणे विनियोगः ॥ ॐ मित्र
स्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳ समिद्धम् ॥ अनाहनस्यं
वसनं जरिष्णुः परीदं वाज्यजिनं दधेहम् ॥ इति मन्त्रेण बहिर्लोम यथास्या
त्तथोत्तरीयधारणं कृत्वा द्विराचमनं कुर्यात् ॥ दण्डं तूष्णीमाचार्यः मयच्छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप. ७

ति ॥ कुमारश्च ॥ ॐ यो मे दण्ड इति मन्त्रस्य प्रजापतिरृषिर्यजुर्दण्डो देवता
दण्डग्रहणे विनियोगः ॥ ॐ यो मे दण्डः परापतद्वैहायसोधिभूम्याम् ॥ तमहं पुन
राददं आयुषे ब्रह्मणे ब्रह्मवर्चसाय ॥ इति मन्त्रेण दक्षिणहस्ते गृह्णीयात् ॥
तत आचार्यः स्वाञ्जलिस्थाभिरद्भिः कुमारस्याञ्जलिं ॐ आपोहिष्ठेति
तिसृणां सिन्धुद्वीपऋषिर्गायत्री छन्द आपो देवता अञ्जलिपूरणे विनि
योगः ॥ ॐ आपो हिष्ठा मयोभुवस्तान ऊर्जे दधातन ॥ महे रणाय चक्षसे ॥
इति मन्त्रेण प्रथमवारं पूरयेत् ॥ कुमारश्चोर्द्ध्वमुत्क्षिपेत् ॥ ॐ यो वः शिवत

एम: ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोरसतत्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥ इति मन्त्रेण द्वितीयवारम् ॥
कुमारस्याञ्जलिमुत्क्षिपेत् ॥ ॐ तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ ॥
आपोजनयथा च नः ॥ इति मन्त्रेण तृतीयवारं पूरयेत् ॥ कुमारस्याञ्जलिमुत्क्षि
पेत् ॥ तत आचार्येण सूर्यमुदीक्षस्व इति प्रेषितः कुमारः ॐ तच्चक्षुरि
त्यस्य दध्यङ्ङाथर्वण ऋषिः रक्षुरातीतपुर उष्णिक्छन्दः सूर्यो देवता सूर्यो
दीक्षणे विनियोगः ॥ ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः
शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप: स्यामशरदः शतंभूयश्चशरदः शतात् ॥ इतिमन्त्रं पठित्वा सूर्यं पश्येत् ॥
८ तत आचार्यः कुमारस्यस्कन्धोपरिस्वदक्षहस्तंनीत्वा तस्य हृदयं ॐ मम
व्रतइति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोबृहस्पतिर्देवता हृदयालंभ
नेविनियोगः ॥ ॐ ममव्रते ते हृदयं दधामि ॥ ॐ ममचित्तमनुचित्तं तेऽ
स्तु ॥ ॐ ममवाचमेकमना जुषस्व ॥ ॐ बृहस्पतिष्ट्वा नियुनक्तु मह्य
म् ॥ इतिमन्त्रेण स्पृशेत् ॥ तत आचार्यः कुमारस्य दक्षिणहस्तं स्वद एम:
क्षिणहस्तेन गृहीत्वा कोनामासि इति वदेत् ॥ कुमारश्च पूर्णचन्द्रवीरवि ८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमवर्माहं भो इतिप्रतिवेदेत् ॥ तत आचार्यः कस्यब्रह्मचार्यसि ॥ कु
मारेण भवतः इत्युच्यमाने ॥ ॐ इन्द्रस्येति प्रजापतिऋषिर्यजुर्लिङ्गो
क्ता देवता जपे विनियोगः ॥ ॐ इन्द्रस्य ब्रह्मचार्यसि अग्निराचार्यस्तव
॥ अहमाचार्यस्तव छत्रराजवीरविक्रमवर्मन् ॥ आचार्यः पठेत् ॥ तत
आचार्यः वद्धाञ्जलेः कुमारस्य बाहुं गृहीत्वोत्थाप्य रक्षार्थं देवविशे
षेभ्यो दद्यात् ॥ ॐ प्रजापतय इत्यस्य प्रजापतिऋषिर्यजुर्लिङ्गोक्ता दे
वता रक्षणे विनियोगः ॥ ॐ प्रजापतये त्वा परिददामि ॥ ॐ देवाय त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप० सवित्रे परिददामि ॥ ॐ अद्भ्यस्त्वौषधीभ्यस्त्वा परिददामि ॥ ॐ द्यावापृथि
९ वीभ्यां त्वा परिददामि ॥ ॐ विश्वेभ्यस्त्वा भूतेभ्यः परिददामि ॥ ॐ सर्वेभ्य
स्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै ॥ ततः कुमारोऽग्निं प्रदक्षिणीकृत्य आचा
र्योत्तरतः उपविशेत् ॥ तत आचार्यः अग्नेर्दक्षिणदिशि स्थापितपीठे
प्रागग्रान्बहून्दर्भानास्तीर्य प्राङ्मुखमग्रेरुत्तरत आसीनं कर्मनत्वसंज्ञा
स्मरणं बटुं वा चन्दनाक्षतपुष्पमाल्यवस्त्रादिभिः संपूज्य कुशादीन्याद्य रामः
य अद्येह काश्यपगोत्रस्य खगेन्द्रराजशर्मणो मम यजमानकुमारस्य पूर्ण ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छत्रराजवीरविक्रमनाम्नः कुमारस्य उपनयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्म
कर्मकर्तुं ब्रह्मत्वेन त्वामहं वृणे ॥ ॐ वृतोस्मीत्युक्त्वा अग्नेः पूर्वेणागत्य
त्य पूर्वस्थापित आसने उपवेशयेत् ॥ तत आचार्यः अग्नेर्वायव्ये उत्त
रे च आसनद्वयं कल्पयित्वा प्रणीतापात्रं दक्षिणहस्तेन वामहस्ते पू
र्वाग्रं निधाय दक्षहस्तोद्धृतपात्रस्थोदकेन आत्माभिमुखं पूरयित्वा दक्ष
हस्तानामिकया आलभ्य अग्न्युत्तरासने निदध्यात् ॥ ततो बर्हिर्मुष्टिमा
दाय आग्नेयादीशानान्तं उदगग्रैः ॥ ब्रह्मणोग्निपर्यन्तं प्रागग्रैः ॥ नैरृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग

न्याद्वायव्यान्तमुदग्रैः॥ अग्नितः प्रणीतापर्यन्तं पूर्वाग्रैः॥ बर्हिर्भिः परिस्तर
णं कुर्यात्॥ उदगग्राः प्राक्संस्था उदक्संस्था वा पदार्थाः स्थाप्याः॥ प
वित्रच्छेदनार्थं कुशपत्रत्रयम्॥ पवित्रे साग्रे नन्तर्गर्भे कुशपत्रे॥ प्रोक्षणी
पात्रम्॥ आज्यस्थाली॥ सम्मार्जनकुशास्त्रयः साग्राः समूलाः॥ उपय
मनकुशास्त्रयो दश॥ समिधस्तिस्रः प्रादेशमात्राः पालाश्यः॥ स्रुवः॥ आ
ज्यं गव्यम्॥ पूर्णपात्रम्॥ समिन्धनकाष्ठानि दश॥ तिस्रः पालाश्यः स
मिधः॥ पर्युक्षणार्थमुदकम्॥ भिक्षापात्रम्॥ तत आसादिते कुशपत्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहीत्वा अग्रतः प्रादेशमात्रं निधाय तयोरुपरि आसादितानि त्रीणि
कुशतरुणानि तिर्यङ्निधाय पवित्रमूलेन पवित्रे प्रदक्षिणमावेष्ट्य त्र
याणां मूलाग्राणि द्वयोर्मूलानि च दक्षिणहस्तेन पवित्रे वामहस्तेन
परिगृह्य छित्वा द्वयोर्मूलं त्रीणि चोत्तरतः क्षिपेत्॥ततः प्रोक्षणीपात्रं
प्रणीताया उत्तरतो निधाय प्रणीतोदकं सपवित्रहस्तेन त्रिर्निक्षिप्य
प्रणीतोदकं पवित्राभ्यां प्रादेशमात्रमूर्ध्वं क्षिप्त्वा पवित्रे प्रोक्षणीपात्रे नि
धाय प्रोक्षणीपात्रं दक्षहस्तेन वामहस्ते निधाय तदुदकं दक्षहस्ताङ्गु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ ष्ठानामिकाभ्यां त्रिरूर्ध्वोर्ध्वं नी क्षिप्त्वा प्रणीतोदकेन प्रोक्षेत् ॥ प्रोक्षणीमुद
११ केन आसादितपात्राण्युत्तानि कृत्वा एकैकशस्त्रिः प्रोक्ष्य असञ्चरे
प्रणीताग्न्योर्मध्ये प्रोक्षणीं निदध्यात् ॥ तत आज्यस्थालीमग्नेः पश्चा
न्निधाय तत्र आत्माभिमुखमाज्यं प्रक्षिप्य आज्यस्थालीमग्नावारो
प्य ज्वलदुल्मुकं आज्यस्योपरि समन्तादीशानीमारभ्य प्रदक्षिणं भ्रा राम॰
मयित्वा अग्नौ प्रक्षिप्य उदकं स्पृष्ट्वा इतरथा हस्तमावर्तयेत् ॥ ततो द ११
क्षिणहस्तेन स्रुवमादाय पूर्वाग्रमधोबिलमग्नौ तापयित्वा वामहस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्तानबिलं निधाय दक्षहस्तधृतमध्यानां सम्मार्जनकुशानामग्रैर्मूलतोऽ
ग्रपर्यन्तं संमृज्य सम्मार्जनकुशानुत्तरतो निरस्य प्रणीतोदकेन स्रुक्पा
णिनाभ्युक्ष्य पूर्ववत्प्रतप्य उदकं स्पृष्ट्वा दक्षिणतः स्वसमीपे स्थापये
त्॥ तत आज्यमुत्थाप्य अग्नेरुत्तरतः प्रोक्षणीपश्चाद्भागे स्थापयित्वा
ततोऽग्नेः पश्चादानीय पवित्राभ्यां किञ्चिदाज्यं प्रादेशमात्रं ऊर्ध्वे
क्षिप्त्वा आज्यमवेक्ष्य अपद्रव्ये सति तन्निरस्य प्रोक्षणीं च आज्यं
च पूर्ववत्पवित्राभ्यामुत्पूय प्रोक्षिरायां पवित्रे निदध्यात्॥ उपयमन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप॰ कुशान्दक्षहस्तेन वामहस्ते निधाय पूर्वोपकल्पितास्तिस्रः समिध आदा
१२ य उत्थाय अग्नौ प्रागग्राः प्रक्षिप्य दक्षिणा चुलुकगृहीतेन सपवित्रेण
ऽशेषप्रोक्षण्युदकेन अग्निं ईशानादि उदकपर्यन्तं परिषिच्य हस्तमित
रथाऽऽवर्त्य पवित्रे प्रणीतासु निदध्यात् ॥ तत आचार्यः संस्रवधार
णपात्रं प्रणीताग्न्योर्मध्ये निधाय ब्रह्मणा कुशेन दक्षिणबाहावन्वा
रब्धः पातितदक्षजानुः सोपयमनकुशं वामहस्तं हृदये निधाय उत्ता रा म॰
नेन दक्षहस्तेन शंखमुद्रया मध्यमूलयोर्मध्ये धृतेन स्रुवेण आज्यं १२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहीत्वा ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्दे
वता आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न
मम ॥ सर्वत्र त्यागान्ते प्रक्षेपः॥ इति मनसा ॥ अग्नेरुत्तरभागे प्राञ्चमृ
जुमूर्ध्वं सन्तत-धारं पूर्वाघारं हुत्वाऽवशिष्टं संस्रवीयपात्रे निःक्षिपे
त्॥ ॐ इन्द्रायेति प्रजापतिऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे
विनियोगः॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम ॥ ॐ ग्नेर्दक्षिणभागे
पूर्ववदुत्तराघारं जुहुयात्॥ इत्याघारौ ॥ समिद्धतमेग्निप्रदेशे ॥ अग्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप॰
१२

यइतिमन्त्रस्यप्रजापतिऋषिस्त्रिष्टुप्छन्दोग्निर्देवता आज्यहोमेविनियो
गः॥ ॐ अग्नयेस्वाहा इदमग्नयेनमम॥ ॐ सोमायेत्यस्य प्रजापतिऋ
षिस्त्रिष्टुप्छन्दः सोमोदेवता आज्यहोमेविनियोगः॥ ॐ सोमायस्वाहा
इदं सोमायनमम॥ एतावाज्यभागौ॥ ॐ महाव्याहृतीनां प्रजापतिऋ
षिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्निवायुसूर्यादेवता आज्यहोमेवि
नियोगः॥ ॐ भूः स्वाहा इदमग्नये०॥ ॐ भुवः स्वाहा इदं वायवे न मम॥ ॐ
स्वः स्वाहा इदं सूर्याय न मम॥ ॐ त्वन्नो इत्यस्य वामदेवऋषिस्त्रिष्टुप

रामः
१२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छन्दोऽग्नीवरुणौदेवते आज्यहोमे विनियोगः॥ ॐ त्वन्नो अग्ने वरुणस्य
विद्वान्देवस्य हेडो अवया सिसीष्ठाः॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा
द्वेषां ᳪसि प्रमुमुग्ध्यस्मत्स्वाहा॥ इदमग्निवरुणाभ्यां न मम॥ ॐ सत्वमि
त्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दोग्निवरुणौ देवते आज्यहोमे विनियोगः
द्वितीयो ॐ सत्वन्नो अग्नेवमो भवोतीने दिष्ठो अस्या उषसो व्युष्टौ॥ अवयक्ष्वनोवरु
णᳪ᳭ रराणोवीहिम्मृडीकᳪ᳭ सुहवोन एधि स्वाहा॥ इदमग्निवरुणाभ्यां
न मम॥ ॐ अयाश्चाग्न इत्यस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्देवता आज्यहोमे विनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमि
त्वमया असि ॥ अयानोयज्ञंवहास्ययानो धेहि भेषजꣳ स्वाहा ॥ इदमग्नये
न मम ॥ ॐ येते शतमित्यस्य वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणसवितृविष्णु
विश्वेदेवा मरुतः स्वर्का देवता आज्यहोमे विनियोगः ॥ ॐ येते शतं वरुण ये
सहस्रं यज्ञियाः पाशा वितता महान्तः ॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मु
ञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो
मरुद्भ्यः स्वर्केभ्यो न मम ॥ ॐ उदुत्तममित्यस्य शुनःशेफ ऋषिस्त्रिष्टुप्छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्दो वरुणो देवता आज्यहोमे विनियोगः॥ ॐ उदुत्तमं वरुणपाशमस्मद
वाधमं विमध्यम ॐ श्रथाय॥ अथा वयमादित्य व्रते तवानागसो अदित
ये स्याम स्वाहा॥ इदं वरुणाय न मम॥ ॐ प्रजापतय इत्यस्य प्रजापति
ऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता आज्यहोमे विनियोगः॥ ॐ प्रजापतये
स्वाहा इदं प्रजापतये न मम॥ अग्नये स्विष्टकृत इत्यस्य प्रजापतिऋषि
र्गायत्री छन्दोऽग्निर्देवता स्विष्टकृद्धोमे विनियोगः॥ ॐ अग्नये स्विष्टकृ
ते स्वाहा इदमग्नये स्विष्टकृते न मम॥ ततः संस्रवं प्राश्य आचम्य पवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ भ्याम् मुखं मार्जयित्वा पवित्रे ग्नौ क्षिपेत् ॥ ततः पूर्णपात्रमादाय कुशा
१५ दीन्गृहीत्वा अद्येह काश्यपगोत्रः खगेन्द्रराजशर्मा अहं ⸺ छत्रराजवीरविक्र ⸺
मनाम्नः यजमानकुमारस्य उपनयनाङ्गहोमकर्मणि कृताकृतावेक्ष
णारूपब्रह्मकर्मप्रतिष्ठार्थमिदं तण्डुलपूर्णपात्रं प्रजापतिदैवतं
गोत्राय ⸺ शर्मणे ब्रह्मणे तुभ्यमहं संप्रददे ॥ इति दद्यात् ॥ ब्रह्मा च
प्रतिगृह्य स्वस्ति इति ब्रूयात् ॥ ॐ सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रिया इति मन्त्रयोः रामः
प्रजापतिऋषिर्यजुराऽऽपो देवता प्रणीताविमोके विनियोगः ॥ ॐ सुमित्रि १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यानः आपः ओषधयः सन्तु ॥ इति मन्त्रेण प्रणीताजलेन शिरोऽभिषिच्य
ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यंच वयंद्विष्मः ॥ इति मन्त्रेण साः
वशिष्टजलं प्रणीतापात्रं ऐशान्यां न्युब्जीकुर्यात् ॥ तत आस्तरणक्रमेण
वर्हिरुत्थाप्य ॥ ॐ देवा गातु इत्यस्य मनस्पतिऋषिर्विराट्छन्दो वातोदेवता
वर्हिर्होमे विनियोगः ॥ ॐ देवागातुविदोगातुंवित्वा गातुमित ॥ मनसस्प
तः इमन्देवयज्ञं स्वाहा वातेधाः स्वाहा ॥ इदं प्रजापतये न मम ॥ इति म
न्त्रेण हस्तेन वर्हिर्जुहुयात् ॥ तत आचार्यः कुमारं ॐ ब्रह्मचार्यसि इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रूयात् ॥ ॐ अश्नानि इति कुमारः ॥ आचार्यः अपोशान इति ब्रूयात् ॥
ॐ अश्नानि इति कुमारः ॥ आचार्यः ॐ कर्म कुरु इति ब्रूयात् ॥ ॐ
करवाणि इति कुमारः ॥ आचार्यः ॐ मा दिवा सुषुप्थाः इति ब्रूया
त् ॥ ॐ न स्वपानि इति कुमारः ॥ आचार्यः वाचं यच्छ इति ब्रूयात् ॥
ॐ यच्छानि इति कुमारः ॥ आचार्यः समिधमाधेहि इति ब्रूयात् ॥
ॐ आदधानि इति कुमारः ॥ आचार्यः ॐ अपोशान इति ब्रूयात् ॥ ॐ
अश्नानि इति कुमारो ब्रूयात् ॥ तत आचार्यः द्रव्यादिकं गृहीत्वा कु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शादीन्यादाय अद्येह काश्यपगोत्रस्य खगेन्द्रराजशर्मणो मम यजमान
कुमारस्य छत्रराजवीरविक्रमनाम्नः उपनयनलग्नादरिष्टस्थानस्थित
ग्रह सूचयिष्यमाणदोषनिवारणार्थमिमां गो रुद्रदेवताकां तत्प्र
त्याम्नायीभूतं रजतं चन्द्रदैवतं शर्मणे ब्राह्म
णाय दैवज्ञाय दातुमहमुत्सृजे ॥ इति दत्वा ॥ ॐ कपिले सर्वदेवानां पूज
नीयासि रोहिणी ॥ तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥ इति संप्रा
र्थ्य दानप्रतिष्ठाद्रव्यमादाय अद्य कृतैतद्गोप्रत्याम्नायीभूतरजतदान

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ प्रतिष्ठार्थमिमां दक्षिणां रौप्यं चन्द्रदैवतं गोत्राय शर्मणे
९७ ब्राह्मणाय दैवज्ञाय दातुमहमुत्सृजे ॥ इति दद्यात् ॥ ततोग्रे स्थितः प्रत्य
ङ्मुखस्थितकुमारः उत्तानस्ववाममणिबन्धे उत्तानं दक्षिणमणि
बन्धं निधाय पूर्वं स्वकर्णौ स्पृशन् उत्तानेन पद्माकारेण करेण
दक्षिणेन दक्षिणं वामेन वामं आचार्यचरणौ स्पृष्ट्वा काश्यपगोत्रः
काश्यपावत्सारनैध्रुवेति त्रिप्रवरः छत्रराजवीरविक्रमनामाऽहं भो गुरो राम:
अभिवादये इति वदेत् ॥ गुरुश्च आयुष्मान्भव सौम्य छत्रराजवीरविक्र- ९७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म वर्मन्नू ३ इति सुतान्तं नाम पठित्वा ग्रीवं दद्यात्॥ ततः समीपाव
स्थिताय गुरुं समीक्षमाणाय स्वयं समीक्षिताय निवारितसूर्यं इष्टां
शके सावित्रीमुपदिशेत्॥ ततो गुरुराचमनं कृत्वा कुमारं चाचामयि
त्वा ॐकारस्य ब्रह्मऋषिर्दैवी गायत्री छन्दः परमात्मा देवता सर्वकर्मा
रम्भे विनियोगः॥ ॐ भूर्भुवः स्वः सप्ततुरङ्गाय विद्महे सहस्रकिर
णाय धीमहि॥ तन्नो रविः प्रचोदयात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

५ की राा अलका ८ ५ भी

इतिश्रावयित्वाऽऽचामयेत् ॥ ततः कुमारः गुरुं प्रणम्य अग्नेः पश्चादुप
विष्टः घृताक्तं शुष्कमनिषिद्धं काष्ठकरीषादीन्धनं पञ्चभिर्मन्त्रैरेकैकं
दक्षिणेनैव पाणिनाऽग्नौ प्रक्षिपेत् ॥ ॐ अग्ने सुश्रव इत्यादीनां पञ्चा
नां ब्रह्मऋषिर्यजूंष्यग्निर्देवता समिन्धने विनियोगः ॥ ॐ अग्ने सुश्रवः
सुश्रवसं मा कुरु ॥ १ ॥ ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि ॥ २ ॥ ॐ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं मां सुश्रवः सौश्रवसं कुरु॥ ३॥ ॐ यथा त्वमग्ने देवानां यज्ञस्य नि
धिपा असि॥ ४॥ एवमहं मनुष्याणां वेदस्य निधिपो भूयासम्॥ ५॥
ततः कुमारः प्रज्वलितमग्निं दक्षहस्तेन वारिणा प्रदक्षिणमीशानादी
शानपर्यन्तं पर्युक्ष्य तिस्रः समिध आदाय उत्थाय ॐ अग्नये इति
मन्त्रस्य प्रजापतिऋषिराकृतिछन्दः समिद्देवता समिदाधाने विनियो
गः॥ ॐ अग्नये समिधमहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा
समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप.
१९

मेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णु
यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳ स्वाहा ॥ इतिम
न्त्रेणैकां प्रागग्रामग्नौ क्षिपेत् ॥ मन्त्रावृत्त्या द्वितीयां तृतीयां च
समिधं प्रक्षिपेत् ॥ ततः कुमारः अग्नेः पश्चा उपविष्टः घृताक्तं शुष्क
मनिबिडं काष्ठकरीषादीन्धनं पूर्ववत्पञ्चभिर्मन्त्रैः प्रक्षिपेत् ॥ ॐ अ
ग्नेसुश्रवः इत्यादीनांब्रह्म ऋषिर्यजुंष्यग्निर्देवता समिन्धने विनियो रामः
ग ॥ ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु ॥ १ ॥ ॐ यथात्वमग्ने सुश्रवः १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुश्रवा असि ॥२॥ ॐ एवं माꣳ सुश्रवः सौश्रवसं कुरु ॥३॥ ॐ यथा
त्वमग्ने देवानां यज्ञस्य निधिपा असि ॥४॥ ॐ एवमहं मनुष्याणां
वेदस्य निधिपो भूयासम् ॥५॥ इति सन्धुक्ष्य दक्षहस्तस्थवारिणाग्नेः
दक्षिणगमीशानादीशानपर्यन्तं पर्युक्ष्य उभौ हस्तौ तूष्णीमग्नौ ताप
यित्वा तनूपा इत्यादि मन्त्रैः प्रतिमन्त्रं ललाटाच्चिबुकान्तं तापिता
भ्यां हस्ताभ्यां विमृज्यात् ॥ ॐ तनूपा इत्यादीनां सप्तानां बृहद्देवता
ऋषयो यजूंष्यग्निर्देवता मुखविमर्शने विनियोगः ॥ ॐ तनूपा अग्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ सि तन्वं मे पाहि ॥१॥ ॐ आयुर्दा अग्नेस्यायुर्मे देहि ॥२॥ ॐ वर्चोदा अ
२० ग्नेसि वर्चो मे देहि ॥३॥ ॐ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥४॥
ॐ मेधां मे देवः सविता आदधातु ॥५॥ ॐ मेधां देवी सरस्वती आद मे
धातु ॥६॥ ॐ मेधामश्विनौ देवावाधत्तां पुष्करस्रजौ ॥७॥ अथाचा
रतोङ्गालम्भनं कुर्यात् ॥ कुमारस्तनदङ्गानि हस्ताग्रेण स्पृष्ट्वा मन्त्रा सप॰
ञ्जपेत् ॥ ॐ अङ्गानि च म इत्यादीनां प्रजापतिरृषिर्यजूंषि लिङ्गोक्ता २०
देवता आप्यायने विनियोगः ॥ ॐ अङ्गानि च म आप्यायन्ताम् ॥ शिरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रभृतिपादान्तं स्पृशेत् ॥ ॐ वाक्चम आप्यायताम् ॥ इति पञ्चाङ्गुली
भिर्मुखं स्पृशेत् ॥ ॐ प्राणश्चम आप्यायताम् ॥ अङ्गुष्ठतर्जनीभ्यां मु
गपन्नासिकारन्ध्रद्वयं स्पृशेत् ॥ ॐ चक्षुश्चम आप्यायताम् ॥ अना
मिकाङ्गुष्ठाभ्यां दक्षिणचक्षुः स्पृशेत् ॥ एवं ॐ चक्षुश्चम आप्याय
ताम् ॥ पूर्ववद्वाममपि ॥ ॐ श्रोत्रंचम आप्यायताम् ॥ चक्षुर्वद्दक्षश्रो
त्रं स्पृशेत् ॥ एवं मन्त्रावृत्त्या वाममपि ॥ ॐ यशोबलंचम आप्याय
ताम् ॥ इत्यस्य जपमात्रम् ॥ नमो गुरुरुस्थाय कुमार स्पृष्टश्रुवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप· घृतेन ॐ मूर्धानमित्यस्य भारद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पूर्णा
२१ हुतिहोमे विनियोगः॥ ॐ मूर्धानन्दिवो अरतिं पृथिव्या वैश्वानरमृत
आजातमग्निम्॥ कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनय
न्तदेवाः स्वाहा॥ इति पूर्णाहुतिं हुत्वा कुमारः श्रुवेणानीतं भस्म द
क्षिणकराऽनामिकया गृहीत्वा ॐ त्र्यायुषमित्यस्य नारायणऋषि
रुष्णिक्छन्द आयुर्देवता भस्मना तिलककरणे विनियोगः ॐ त्र्यायु रामः
षंजमदग्नेः इति ललाटे॥ ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायाम्॥ २१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ यद्देवेषु त्र्यायुषम् इति दक्षस्कन्धे ॥ ॐ तन्नो अस्तु त्र्यायुषम् इति
हृदये धारयेत् ॥ ततो मध्याह्नसन्ध्यामुपास्य कुमारः श्रोत्रसमावु
चौ करौ कृत्वाञ्जलिं बध्वा काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिवरः अभिवादये छत्रराजवीरविक्रमनामाहमस्मि भो वैश्वानर ॥ इति
वैश्वानरमभिवाद्य. काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिवरः अ
भिवादये छत्रराजवीरविक्रमनामाहमस्मि भो वरुण ॥ इति वरुणमभि
वादयेत् ॥ तत उत्तानं मणिबन्धे उत्तानं दक्षिणमणिबन्धं निधाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप. पूर्वं स्वकर्णौ स्पृष्ट्वा उत्तानेन पद्माकारेण करेण दक्षिणेन दक्षिणं वा
२२ मेन वामं गुरोश्चरणौ स्पृशन् काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति
त्रिवरः अभिवादये छत्रराजवीरविक्रम नामाहमस्मि भो गुरो ॥ इति गुरु
मभिवादयेत् ॥ गुरुश्च आयुष्मान् भव सौम्य छत्रराजवीरविक्रमवर्मन्
३इत्याशिषं दद्यात् ॥ ततः कुमारः दण्डं गृहीत्वा अग्निं प्रदक्षिणी रामः
कृत्य भिक्षापात्रमादाय भिक्षां भवति देहि इत्युक्त्वा प्रथमं मात २२
रम् ॥ ततोऽन्यां भिक्षां च भिक्षित्वा भो गुरो इयं भिक्षा मया लब्धा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति गुरवे निवेदयेत् ॥ अत्र गोदानं कुर्यात् ॥ अद्येह काश्यपगोत्रः
काश्यपावत्सारनैध्रुवेतित्रिप्रवरः छत्रराजवीरविक्रमकुमारोहं मम कृत
स्याऽस्योपनयनकर्मणः प्रतिष्ठासाङ्गतासिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं
दीयमानामिमां सुपूजितां यथोपपन्नोपस्करसहितां गां रुद्रदेव
ताकां काश्यपगोत्राय शर्मणे ब्राह्मणाय तुभ्यम
हं संप्रददे ॥ कपिले सर्वदेवानां पूजनीयासि रोहिणी ॥ तीर्थदेवमयी
यस्मादतः शान्तिं प्रयच्छ मे ॥ इति संप्रार्थ्य दानप्रतिष्ठां दद्यात् ॥ अद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप॰ कृतैतनङ्गोपत्याम्नायएजनस्वर्णउदानकर्मणः साङ्गताफलप्राप्त्यर्थं रौप्यं
२२ चन्द्रदैवतं काश्यपगोत्राय शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे॥
॥ ॥अनुपनयनम्॥ ॥अथ वेदारम्भः॥ ॥गुरुः आच
म्य वेदीं दर्भैस्त्रिः समूह्य तानैशान्यां परित्यज्य गोमयोदकेन उपलि
प्य स्रुवमूलेन स्फ्येन वा प्रादेशदीर्घाः स्थण्डिलप्रमाणा वा प्रागग्रा उद रामः
क्संस्थास्तिस्रो रेखाः कृत्वा अनामिकाङ्गुष्ठाभ्यां यथोल्लेखं पांसूनुद्धृ
त्य ऊर्ध्वं क्षिप्त्वा उदकेन वेदीं न्युब्जपाणिना ऽभिषिच्य कांस्यपात्रे २३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गिहितं तेनैव पिहितं हरिनामाग्निं वेद्या आग्नेय भागे निधाय कुव्या
दांशं निर्ऋतिदिशि परित्यज्य स्थण्डिले स्वाभिमुखं स्थापयित्वा पात्रे
साक्षतमुदकं क्षिपेत् ॥ अग्नेर्दक्षिणा दि[illegible]स्थाऽऽसने प्रागग्रान्षड्दर्भा
नास्तीर्य । अग्नेरुत्तरतः प्राङ्मुखं कर्मतत्त्वज्ञं ब्राह्मणं चन्दनाक्षतपुष्प
वस्त्रद्रव्यादिभिः सन्तोष्य अद्येह काश्यपगोत्रः खगेन्द्रराजशर्माहं काश्यप
गोत्रस्य छत्रराजवीरविक्रमनाम्नो वटोर्वेदारम्भकर्माऽहं करिष्ये तदङ्ग
होमकर्मणि गोत्र शर्मन् त्वं मे ब्रह्मा भव ॥ इति वदेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप· ब्रह्मा च भवानि इत्युक्त्वा अग्नेः पूर्वेणागत्य पूर्वस्थापितासने उपवि
२४ शेत्॥ ततो वितस्तिमात्रीं भुवं विहाय अग्नेर्वायव्ये उत्तरे च प्रागग्रकु
शैरासनद्वयं कल्पयित्वा प्रणीतापात्रं दक्षिणहस्तेन वामहस्ते पूर्वाग्रं
निधाय दक्षहस्तोद्धृतपात्रस्थोदकेन आत्माभिमुखं पूरयित्वा वायव्या
सने निधाय दक्षिणहस्तानामिकयाऽऽलभ्य अग्न्युत्तरासने निदध्या
त्॥ ततो बर्हिर्मुष्टिमादाय चतुर्धा विभज्य एकैकभागेन आग्नेया रामः
दीशानान्तमुत्तराग्रम्॥ ब्रह्मणोऽग्निपर्यन्तं पूर्वाग्रम्॥ नैरृत्याद्वायव्या २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्नं उत्तराग्रम् ॥ अग्नितः प्रणीता पर्यन्तमुत्तराग्रम् ॥ परिस्तीर्य पात्रा
दीन्यासादयेत् ॥ पवित्रच्छेदनार्थं त्रीणि कुशतरुणानि ॥ पवित्रे सा
ग्रेऽनन्तर्गर्भे कुशपत्रे द्वे ॥ प्रोक्षणी पात्रम् ॥ आज्यस्थाली ॥ संमार्जन
कुशास्त्रयः साग्राः उपयमनकुशास्त्रयो दश ॥ समिधस्तिस्रः प्रादेश
मात्राः पालाश्यः ॥ स्रुवः ॥ गव्यमाज्यम् ॥ वेदपुस्तकम् ॥ पूर्णपात्रम् ॥
तत आसादिते कुशपत्रे गृहीत्वा अग्रतः प्रादेशमात्रं विहाय तयोरु
परि त्रीणि कुशतरुणानि तिर्यङ् निधाय पवित्रमूलेन पवित्रे प्रदक्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उप॰ णमावेष्ट्यत्रयाणां मूलाग्राणि द्वयोर्मूलानि च दक्षिणहस्तेन पवित्रे
२५ वामहस्तेन परिगृह्य छित्वा द्वयोर्मूलं त्रीणि चोत्तरतः क्षिपेत्॥ ततः
प्रोक्षणीपात्रं प्रणीताया उत्तरतो निधाय तत्र प्रणीतोदकं सपवित्र
हस्तेन त्रिर्निक्षिप्य तदुदकं पवित्राभ्यां प्रादेशमात्रं ऊर्ध्वं क्षिप्त्वा प
वित्रे प्रोक्षणीपात्रे निधाय प्रोक्षणीपात्रं दक्षहस्तेन वामहस्ते निधा रामः
य तदुदकं दक्षिणहस्ताऽनामिकाङ्गुष्ठाभ्यां त्रिरूर्ध्वोर्ध्वं क्षिप्त्वा प्र
णीतोदकेन प्रोक्षेत्॥ प्रोक्षण्युदकेन आसादितानि युञ्जान्युत्तानि ना २५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्वा एकैककुशाग्रैः प्रोक्ष्य असंचरे प्रणीताग्न्योर्मध्ये प्रोक्षणीं निद
ध्यात् ॥ तत आज्यस्थालीमग्नेः पश्चान्निधाय तत्र आज्यमान्याभिमुखं
प्रक्षिप्य आज्यस्थालीं अग्नावारोप्य ज्वलदुल्मुकं आज्यस्य उपरि
समन्तादीशानीमारभ्य प्रदक्षिणं भ्रामयित्वा अग्नौ प्रक्षिप्य उदकं
स्पृष्ट्वा इतरथा हस्तमावर्तयेत् ॥ दक्षहस्तेन स्रुवमादाय पूर्वाग्रमधोवि
लमग्नौ तापयित्वा वामहस्ते उत्तानबिलं निधाय दक्षिणहस्तधृतम
ध्यानां सम्मार्जनकुशानामग्रैर्मूलतोऽग्रपर्यन्तं मूलैरग्रतो मूलपर्यन्तं सं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृज्य संम्मार्जनकुशानुत्तरतो निरस्य प्रणीतोदकेन न्युब्जपाणिनाऽभ्यु
क्ष्य पूर्ववन्मुत्त ष्य उदकं स्पृष्ट्वा दक्षिणतः स्वसमीपे निदध्यात् ॥ तत
आज्यमुत्थाप्य अग्नेरुत्तरतः प्रोक्षणीपश्चाद्भागे संस्थाप्य अग्नेः पश्चा
दानीय पवित्राभ्यां किञ्चिदाज्यं प्रादेशमात्रमूर्ध्वं क्षिप्त्वा आज्यमव
लोक्य अपद्रव्ये सति तन्निरस्य प्रोक्षणीश्चाज्यं पूर्ववदुत्पूय प्रोक्षि
णयां पवित्रे निदध्यात् ॥ उपयमनकुशान्दक्षहस्तेन वामहस्ते निधाय
पूर्वमासादितास्तिस्त्रः समिधः आदाय उत्थाय अग्नौ प्रागग्राः प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षिप्य दक्षिणचुलुकगृहीतेन सपवित्रेण शेषेण प्रोक्षणयुदकेन अ
ग्निं ईशानाद्युदक्पर्यन्तं परिषिच्य हस्तमितरथावर्त्य पवित्रे प्रणीतासु
निदध्यात्॥ ततः ब्रह्मणा कुशेन दक्षिणबाहो अन्वारब्धः पातितद
क्षिणजानुः सोपयमनकुशं वामहस्तं हृदये निधाय उत्तानेन दक्षि
णहस्तेन शंखमुद्रया मध्यमूलयोर्मध्ये धृतेन स्रुवेण आज्येन ॐ प्र
जापतय इति मन्त्रस्य प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता
आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इति मनसा ॥ सर्वत्र त्यागान्ते द्रव्यप्रक्षेपः ॥ ॐ इन्द्रायेति मन्त्रस्य प्र
जापतिऋषिस्त्रिष्टुप्छन्दः इन्द्रो देवता आज्यहोमे विनियोगः ॥ ॐ इन्द्रा
य स्वाहा इदमिन्द्राय न मम ॥ एतावाघारौ ॥ ॐ अग्नय इति मन्त्रस्य
प्रजापतिऋषिस्त्रिष्टुप्छन्दोग्निर्देवता आज्यहोमे विनियोगः ॥ ॐ अ
ग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमायेति प्रजापतिऋषिस्त्रिष्टु
प्छन्दः सोमो देवता आज्यहोमे विनियोगः ॥ ॐ सोमाय स्वाहा
इदं सोमाय न मम ॥ एतावाज्यभागौ ॥ ततो ब्रह्मणान्वारब्धः आ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्येन ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय न मम ॥ ॐ वायवे स्वाहा
इदं वायवे न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ छन्दो
भ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ इति यजुर्वेदाहुतयः ॥ ॐ पृथिव्यै
स्वाहा इदं पृथिव्यै न मम ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ
ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो
न मम ॥ इति ऋग्वेदाहुतयः ॥ ॐ दिवे स्वाहा इदं दिवे न मम ॥ ॐ सू
र्याय स्वाहा इदं सूर्याय न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ इति सामवेदाहुतयः ॥
ॐ दिग्भ्यः स्वाहा इदं दिग्भ्यो न मम ॥ ॐ चन्द्रमसे स्वाहा इदं चन्द्रम
से न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ छन्दोभ्यः स्वाहा
इदं छन्दोभ्यो न मम ॥ इत्यथर्ववेदाहुतयः ॥ ॐ प्रजापतये स्वाहा इदं
प्रजापतये न मम ॥ इति मनसा ॥ ॐ देवेभ्यः स्वाहा इदं देवेभ्यो न मम ॥
ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो न मम ॥ ॐ श्रद्धायै स्वाहा इदं श्रद्धायै ॥ ॐ
मेधायै स्वाहा इदं० ॥ ॐ सदस्पतये स्वाहा इदं० ॥ ॐ अनुमतये स्वाहा इदं० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोऽन्वारब्धः ॥ व्याहृतीनां प्रजापतिऋृषिर्गायत्र्युष्णिगनुष्टुभश्छन्दां
स्यग्निवायुसूर्यादेवता आज्यहोमे विनियोगः ॥ ॐ भूः स्वाहा इदमग्न
ये न मम ॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥ ॐ स्वः स्वाहा इदं सूर्या
य न मम ॥ ॐ त्वन्न इति मन्त्रस्य वामदेवऋृषिस्त्रिष्टुप्छन्दोग्नीवरुणौ
देवते आज्यहोमे विनियोगः ॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य
हेडो अवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषांꣳ
सि प्रमुमुग्ध्यस्मत्स्वाहा ॥ इदमग्निवरुणाभ्यां न मम ॥ ॐ सत्वन्न इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ मन्त्रस्य वामदेवऋषिस्त्रिष्टुप्छन्दोऽग्नीवरुणौ देवते आज्यहोमे विनि
९५ योगः॥ ॐ सत्वन्नो अग्ने वमो भवोतीनेदिष्ठो अस्या उषसो व्युष्टौ॥
अवयक्ष्वनोवरुणꣳ रराणो वीहिमृडीकꣳ सुहवोनएधि स्वाहा॥इद
मग्निवरुणाभ्यां न मम॥ ॐ अयाश्चाग्न इत्यस्य वामदेवऋषिस्त्रि
ष्टुप्छन्दोऽग्निर्देवता आज्यहोमे विनियोगः॥ ॐ अयाश्चाग्नेस्यनभिश
स्तिपाश्चसत्यमित्वमया असि॥अयानो यज्ञं वहास्य यानो धेहि भेष एम॰
जꣳ स्वाहा॥ इदमग्नये न मम॥ ॐ येते शतमिति मन्त्रस्य वामदेवऋ ९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षिस्त्रिष्टुप्छन्दो वरुणासवितृ विष्णु विश्वेमरुतः स्वर्का देवता आज्यहोमे
विनियोगः ॥ ॐ येतेशतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महा
न्तः ॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥
इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम ॥ ॐ उ
दुत्तमंमिति शुनःशेपऋषिस्त्रिष्टुप्छन्दो वरुणो देवता आज्यहोमे वि
नियोगः ॥ ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳश्रथाय ॥ अ
थावयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा ॥ इदं वरुणाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ २० । न मम ॥ ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्रजापतिर्देवता
आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम॥
ॐ अग्नये स्विष्टकृत इति प्रजापति ऋषिर्गायत्री छन्दोऽग्निर्देवता
स्विष्टकृद्धोमे विनियोगः॥ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्ट
कृतेनमम॥ संस्रवं प्राश्य। आचम्य पवित्राभ्यां मुखं मार्जयित्वा पवित्रे
अग्नौ क्षिपेत्॥ ततः पूर्णपात्रमादाय कुशादीन्यादाय अद्येह का ग॰ म॰
श्यपगोत्रस्य खगेन्द्रराज शर्मणो मम यजमानकुमारस्य धनराजवीरविक्रमब्र- २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृता

ह्मचारिणो वेदारम्भाङ्ग होमकर्मणि कृताङ्गेक्षणरूप ब्रह्मकर्मप्रतिष्ठार्थ
मिदं तण्डुलपूर्णपात्रं प्रजापति दैवतं गोत्राय शर्मणे
ब्राह्मणाय ब्रह्मणे तुभ्यमहं संप्रददे॥ इति दद्यात्॥ ब्रह्मा च स्वस्ती
ति ब्रूयात्॥ ततः सुमित्रिया दुर्मित्रिया इति मन्त्रयोः प्रजापति ऋषि
र्यजुरापो देवता प्रणीताविमोके विनियोगः॥ ॐ सुमित्रियानऽआप
ओषधयः सन्तु॥ इति प्रणीता जलेन शिरोऽभिषिच्य ॐ दुर्मित्रिया
तस्मै सन्तु योऽस्मान्द्वेष्टियञ्चवयं द्विष्मः॥ इति प्रणीतापात्रं साव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप॰ शिष्टजलं ऐशान्यां न्युब्जीकुर्यात् ॥ ततः आस्तरणक्रमेण वर्हिस्तृस्था
३१ प्य ॐ देवागातु इत्यस्य मनसस्पतिऋषिर्विराट् छन्दो वातो देवता
वर्हिर्होमे विनियोगः ॥ ॐ देवा गातु विदो गातुं वित्वा गातुमित ॥ मनस्प
त इमन्देवयज्ञ ॐ स्वाहा वाते धाः स्वाहा ॥ इदं प्रजापतये न मम ॥ इति
मन्त्रेण हस्तेन जुहुयात् ॥ ततः गणेशं सरस्वतीं लक्ष्मीं नारायणं
वेदपुस्तकं सम्पूज्य ब्रह्मचारी उत्ताने वाममणिवन्धे उत्तानं दक्षि एमः
णमणिवन्धं निधाय पूर्वं स्वकरौ स्पृष्ट्वा उत्तानेन पद्माकारेण ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करेण दक्षिणेन दक्षिणं वामेन वामं गुरोश्चरणं स्पृशन् काश्यप
गोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः छत्रराजवीरविक्रमवर्माहं भो गुरो
अभिवादये ॥ गुरुश्च ॥ आयुष्मान्भव सौम्य पूर्णचन्द्रवीरविक्रमवर्मन् ३
इति सुतान्तमाशिषं दद्यात् ॥ ततः प्रत्यङ्मुखायोपविष्टाय अधीष्व
भो इत्युक्ताय ब्रह्मचारिणे प्रणवव्याहृतिपूर्वां सावित्रीं पाठयित्वा
वेदारम्भं कारयेत् ॥ तद्यथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उप.
३२

बटुकाष्टक

३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथातोधीत्याधीत्यानिराकरणम्॥ प्रतीकं मे विचक्षणं जिह्वा मे म
धु यद्वचः॥ कर्णाभ्यां भूरि शुश्रुवे मा त्वं हार्षीः श्रुतं मयि॥ ब्रह्मणः
प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोसि सनिरसि शान्तिर
स्यनिराकरणमसि ब्रह्मकोशं मे विश॥ वाचा त्वापिदधामीति स्वाकर
णाकरणेरसदन्नौष्ठ मेधामाधुर्यग्रहणधारणोच्चारणशक्तिर्मयि भ
वतु॥ आप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशोबलम्॥ यन्मे श्रु
तं अधीतं तन्मे मनसि तिष्ठतु तिष्ठतु॥ इति॥ नमः ॐ स्वस्ति इत्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वा गुरुं प्रणम्य फलपुष्पसमन्वितब्रह्मचारिकरस्पृष्टस्रुवस्थघृ
३३ तेन ॥ ॐ मूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता पू
र्णाहुतिहोमे विनियोगः ॥ ॐ मूर्धानन्दिवो अरतिं पृथिव्या वैश्वा
नरमृत आजातमग्निम् ॥ कविꣳ सम्राजमतिथिञ्जनानामासन्ना
पात्रंजनयन्तदेवाः स्वाहा ॥ इदमग्नये न मम ॥ इति पूर्णाहुतिञ्जुहु
यात् ॥ ततो ब्रह्मचारी स्रुवेणानीतं भस्म दक्षिणकरानामिकया रामः
गृहीत्वा ॐ त्र्यायुषमिति मन्त्रस्य नारायणऋषिरुष्णिक्छन्द ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आयुर्देवता भस्मना तिलककरणे विनियोगः॥ॐ त्र्यायुषं जमदग्नेरि
ति ललाटे॥ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायाम्॥ॐ यद्देवेषु त्र्या
युषम् इति दक्षस्कन्धे॥ॐ तन्नो अस्तु त्र्यायुषम् इति हृदि धारयेत्॥
अत्र गोदानं कुर्यात्॥ गां तन्निष्क्रयद्रव्यं वा सम्पूज्य विप्रं च संपू
ज्य अद्येह काश्यपगोत्रस्य काश्यपावत्सारनैध्रुवेति त्रिप्रवरस्य पूर्ण
वीरविक्रमनाम्नो ब्रह्मचारिणो मम कृतस्यास्य वेदारम्भकर्मणः प्र
तिष्ठासाङ्गतासिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं दीयमानामिमां सुपू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जितां यथोपपन्नोपस्करसहितां गां रुद्रदेवताकां [illegible]
काश्यपगोत्राय शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ कपि
३४ ले सर्वदेवानां पूजनीयासि रोहिणि ॥ तीर्थदेवमयी यस्मादतः शान्तिं
प्रयच्छ मे ॥ अद्यकृतैतन्तुपूजितगोदानकर्मणः साङ्गफलप्राप्त्यर्थं गो
प्र॰याम्नायीभूत रौप्यरतराउदानकर्मणः साङ्गफलप्राप्त्यर्थं वा रौप्यं राम:
चन्द्रदेवताकं० ॥ ॥ इति वेदारंभः ॥ ॥ अथ समावर्तनम् ॥ वेदादिसमाप्तौ न ३४
मेण ब्रह्मचारिणा यथाशक्ति दक्षिणां दत्वा भो गुरो स्नास्यामि इत्युक्ते स्नाहि इति गुरु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोल्के वहिः शालायां हस्तमात्रां चतुरङ्गुलोच्छ्रितां प्रागुदक्प्रवणां
मृत्तिकादिभिर्वेदीं निर्माय नवाङ्गुष्ठकानिष्ठिकाभ्यां गृहीतैस्त्रिभिर्द
र्भैः स्थण्डिलोपरितः पांसून्पूर्ववत्त्रि रपसार्य दर्भान्नैऋत्यां क्षिप्त्वा
गोमयोदकेन उपलिप्य खादिरेण श्रुवेण स्फ्येन कुशमूलेन वा
प्रादेशदीर्घाः स्थण्डिलप्रमाणाः प्रागग्रा उदक्संस्थास्तिस्रो रेखाः
कृत्वा अङ्गुष्ठकनिष्ठाभ्यां प्रतिरेखं यथोल्लेखं पांसूनुद्धृत्योर्ध्वं क्षि
प्त्वा उदकेन स्थण्डिलं स्पुञ्जपाणिनाऽभिषिच्य कांस्यपात्रे निहितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेनैव पिहितं राजपुत्रनामानमग्निं स्थरिडलादाग्नेयभागे निधाय क्रव्यादांशं नैऋत्यां क्षिपेत्॥स्थरिडे स्वाभिमुखमग्निं स्थापयित्वा

३५

अग्न्यानयनपात्रे साक्षतमुदकं क्षिपेत्॥ततो गुरुः अग्नेर्दक्षिणस्यां दिशि स्थापिते पीठासने प्रागग्रान्बहुदर्भान्निधाय अग्नेरुत्तरस्थितं प्राङ्मुखं ब्राह्मणं चन्दनाक्षतादिभिः सम्पूज्य अद्येह काश्यपगोत्रः

राम:

खगेन्द्रराज शर्माहं मम छत्रराजवीरविक्रमनाम्नो- ब्रह्मचारिणः समावर्तन

३५

होमकर्मणि कृताकृतावेक्षणरूप ब्रह्मकर्मकर्तुं गोत्र शर्मन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वं मे ब्रह्मा भव ॥ ब्रह्मा च भवानीत्युक्त्वा अग्नेः पूर्वेणागत्य पूर्व
स्थापिते आसने अग्न्यभिमुख उपविशेत् ॥ ततो वितस्तिमात्रां भुवं
विहाय अग्नेर्वायव्ये उत्तरे च प्रागग्रैः कुशैरासनद्वयं कल्पयित्वा
प्रणीतापात्रं दक्षहस्तेन वामहस्ते पूर्वाग्रं निधाय दक्षहस्तोद्धृतोद
केन आत्माभिमुखं पूरयित्वा वायव्यासने निधाय दक्षहस्तानामिकयाऽऽलभ्य उत्तरासने निदध्यात् ॥ वर्हिर्मुष्टिमादाय तच्चतुर्थांशैराग्नेयादीशानान्तमुत्तराग्रम् ॥ पुनः ब्रह्मणोऽग्निपर्यन्तं पूर्वाग्रम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैरृत्यादाय्यव्याल मुत्तराग्रम् ॥ अग्निनः प्रणीता पर्यन्तं पूर्वाग्रम् ॥
३६ परिस्तरणं कुर्यात् ॥ अथ उदगग्राः प्राक्संस्था उदक्संस्थाः पदार्थाः
स्थाप्याः ॥ पवित्रछेदनार्थं कुशपत्रत्रयम् ॥ पवित्रे साग्रे नन्तर्गर्भे
कुशपत्रे ॥ प्रोक्षणीपात्रम् ॥ आज्यस्थाली ॥ सम्मार्जनकुशास्त्रयः सा
ग्राः ॥ उपयमनकुशास्त्रयो दश ॥ समिधस्तिस्रः प्रादेशमात्राः पालाश्यः
स्रुवः ॥ गव्यमाज्यम् ॥ पूर्णपात्रम् ॥ समिन्धनकाष्ठानि दश ॥ समिध ग म:
स्तिस्रः पालाश्यः ॥ पर्युक्षणार्थमुदकम् ॥ हरितकुशान् ॥ अपो उदकु ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्भात् ॥ दशाङ्गुलमौदुम्बरं दन्तकाष्ठम् ॥ दधि ॥ नापितम् ॥ स्नानार्थमुदकु
म्भम् ॥ उद्वर्त्तनद्रव्यम् ॥ चन्दनम् ॥ अहतवाससी ॥ यज्ञोपवीते ॥ पुष्पमा
ल्यादीनि ॥ उष्णीषम् ॥ कुण्डले ॥ कज्जलम् ॥ आदर्शम् ॥ नूतनं छत्रम् ॥
उपानहौ ॥ वेणुदण्डम् ॥ उपकल्प्य तत आसादिते कुशपत्रे गृहीत्वा
अग्रतः प्रादेशमात्रं विहाय तयोरुपरि त्रीणि कुशतरुणानि तिर्यङ्
निधाय पवित्रमूलेन पवित्रे प्रोक्षणीमावेष्ट्य त्रयाणां मूलाग्राणि
द्वयोर्मूलानि च दक्षिणहस्तेन पवित्रे वामहस्तेन परिगृह्य छित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्योर्मूलं त्रीणि चोत्तरतः क्षिपेत् ॥ प्रोक्षणीपात्रं प्रणीताया उत्तरतो
३८ निधाय प्रणीतोदकं सपवित्रहस्तेन त्रिर्निक्षिप्य तदुदकं पवित्राभ्यां
प्रादेशमात्रमूर्ध्वं क्षिप्त्वा पवित्रे प्रोक्षणीपात्रे निधाय प्रोक्षणीपात्रं
दक्षहस्तेन वामहस्ते निधाय दक्षिणहस्ताऽनामिकाङ्गुष्ठाभ्यां त्रिरू
र्ध्वोर्ध्वं क्षिप्त्वा प्रणीतोदकेन प्रोक्षेत् ॥ प्रोक्षण्युदकेन न्युब्जानि रामः
पात्राण्युत्तानानि कृत्वा एकैकशस्त्रिः प्रोक्ष्य असंचरे प्रणीताग्न्यो ३८
र्मध्ये निदध्यात् ॥ तत आज्यस्थालीमग्नावारोप्य ज्वलदुल्मुकं आ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यस्योपरि समन्तादीशानीमारभ्य प्रदक्षिणां भ्रामयित्वा अग्नौ प्रक्षि
प्य उदकं स्पृष्ट्वा इतरथा हस्तमावर्तयेत् ॥ गुरुर्वामहस्तेन दक्षहस्ते
निधाय पूर्वाग्रमधोबिलं स्रुवमग्नौ तापयित्वा वामे पाणावुत्तानबि
लं निधाय दक्षहस्तधृतमध्यानां सम्मार्जनकुशानामग्रैर्मूलतोऽग्रप
र्यन्तं मूलैरग्रतो मूलपर्यन्तं सम्मृज्य संमार्जनकुशानुत्तरतो निरस्य प्र
णीतोदकेन स्रुवं पाणिनाऽभ्युक्ष्य पूर्ववत्प्रतप्य उदकं स्पृष्ट्वा दक्षिण
तः स्वसमीपे निदध्यात् ॥ आज्यमुत्थाप्य प्रथमतोऽग्नेरुत्तरतः प्रोक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णी पश्चात्स्थापयित्वा ततोऽग्नेः पश्चादानीय पवित्राभ्यां किञ्चिदाज्यं
३८ प्रादेशमात्रं ऊर्ध्वं क्षिप्त्वा आज्यमवलोक्य सत्यपद्व्ये तन्निरस्य
प्रोक्षणीं चाज्यं च पूर्ववदुत्पूय प्रोक्षणीषु पवित्रे निदध्यात् ॥ उपय
मनकुशान्दक्षिणपाणिना वामपाणौ निधाय त्रिस्रः समिध आ
दाय उत्थायाग्नौ प्रागग्राः प्रक्षिप्य दक्ष सुलुकगृहीतेन सपवित्रे राम:
णाऽशेषेण प्रोक्षणस्युदकेन ईशानाद्युदक्पर्यन्तमग्निं परिषिच्य ह ३८
स्तमितरथावर्त्य पवित्रे प्रणीतासु निदध्यात् ॥ ततः ब्रह्मणा वाम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाणौ कुशेनान्वारब्धः पातितदक्षजानुः सोपयमनकुशां वामहस्तं
हृदि निधाय उत्तानेन दक्षिणहस्तेन शंखमुद्रया मध्यमूलयोर्धृतेन
स्रुवेणाज्येन॥ ॐ प्रजापतय इति प्रजापतिऋषिस्त्रिष्टुप्छन्दः प्र
जापतिर्देवता आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा इदं प्र
जापतये न मम॥ सर्वत्र त्यागान्ते द्रव्यप्रक्षेपः॥ इति मनसा अग्नेरुत्त
रभागे प्राञ्चमृजुदीर्घसन्ततधारं पूर्वाघारमाघारयति॥ ॐ इन्द्रायेति
मन्त्रस्य प्रजापतिऋषिस्त्रिष्टुप्छन्द इन्द्रो देवता आज्यहोमे विनियोगः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ इन्द्रायस्वाहा । इदमिन्द्राय न मम ॥ अग्नेर्दक्षिणाभागे प्राञ्चं० इत्या
३९ घारौ ॥ ॐ अग्नयइति प्रजापतिऋषिस्त्रिष्टुप्छन्दोग्निर्देवता आज्यहो
मे विनियोगः ॥ अग्नयेस्वाहा इदमग्नये न मम ॥ अग्नेः समिद्धप्रदेशे
ॐ सोमायेति प्रजापतिऋषिस्त्रिष्टुप्छन्दः सोमो देवता आज्यहोमे विनि
योगः ॥ ॐ सोमाय स्वाहा इदं सोमाय न मम ॥ एतावाज्यभागौ ॥ ततो एम्यः
ब्रह्मणान्वारब्धः ॥ ॐ अन्तरिक्षाय स्वाहा ॥ इदमन्तरिक्षाय न मम ॥
ॐ वायवे स्वाहा इदं वायवे न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ ॐ पृथिव्यै स्वाहा
इदं पृथिव्यै न मम ॥ ॐ अग्नये स्वाहा इदमग्नये ॥ ॐ ब्रह्मणे स्वा
हा इदं ब्रह्मणे न मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥
ॐ दिवे स्वाहा इदं दिवे न मम ॥ ॐ सूर्याय स्वाहा इदं सूर्याय न म
म ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ छन्दोभ्यः स्वाहा इदं छ
न्दोभ्यो न मम ॥ ॐ दिग्भ्यः स्वाहा इदं दिग्भ्यो न मम ॥ ॐ चन्द्रमसे
स्वाहा इदं चन्द्रमसे न मम ॥ ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम ॥ ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम ॥ ॐ प्रजापतये स्वाहा इदं प्रजाप
तये न मम ॥ इति मनसा ॥ ॐ देवेभ्यः स्वाहा इदं देवेभ्यो न मम ॥ ॐ
४० ऋषिभ्यः स्वाहा इदं ऋषिभ्यो न मम ॥ ॐ श्रद्धायै स्वाहा इदं श्रद्धा
यै न मम ॥ ॐ मेधायै स्वाहा इदं मेधायै न मम ॥ ॐ सदस्पतये
स्वाहा इदं सदस्पतये न मम ॥ ॐ अनुमतये स्वाहा इदं अनुमतये राम:
न मम ॥ ततो ब्रह्मणाऽन्वारब्धः ॐ भूर्भुवः स्वरित्यस्य प्रजापतिर्ऋ ४०
षिर्गायत्र्युष्णिगनुष्टुभश्छन्दांसि अग्नि वायु सूर्या देवता आज्यहोमे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनियोगः॥ ॐ भूः स्वाहा इदमग्नयेनमम ॥ ॐ भुवः स्वाहा इदं वाय
वे नमम ॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ॐ त्वन्नो अग्न इत्यस्य
वामदेवऋषिस्त्रिष्टुप्छन्दोग्नीवरुणौदेवते आज्यहोमे विनियोगः॥
ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अव यासिसीष्ठाः॥ यजि
ष्ठो वह्नितमः शोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा॥ इद
मग्निवरुणाभ्यां न मम ॥ ॐ सत्वन्न इति वामदेव ऋषिस्त्रिष्टुप्छ
न्दोग्नीवरुणौ देवते आज्यहोमे विनियोगः॥ ॐ सत्वन्नो अग्नेवैमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवोतीनेदिष्टो अस्या उषसो व्युष्टौ ॥ अव यक्ष्व नो वरुण ᳪ रराणो
वीहि मृडीक ᳪ सुहवो न एधि स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥ ॐ
४१ अयाश्चाग्न इत्यस्य वामदेव ऋषिस्त्रिष्टुप्छन्दोग्निर्देवता आज्यहोमे
विनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमया असि ॥
अयानो यज्ञं वहास्ययानो धेहि भेषज ᳪ स्वाहा ॥ इदमग्नये न मम ॥ ॐ
येनेज्ञातमिति वामदेव ऋषिस्त्रिष्टुप्छन्दो वरुणसवितृविष्णुविश्वेमरुत राम:
स्वर्का देवता आज्यहोमे विनियोगः ॥ ॐ येने ज्ञातं वरुणं ये सहस्रं य ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञियाः पाशा वितता महान्तः॥ तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्च
न्तु मरुतः स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो
मरुद्भ्यः स्वर्केभ्यः॥ ॐ उदुत्तममिति शुनः शेफ ऋषिस्त्रिष्टुप्छन्दो वरुणो
देवता आज्यहोमे विनियोगः॥ ॐ उदुत्तमं वरुणा मस्मदवाधमं विमध्य पाश
मꣳ श्रथाय॥ अथा वयमादित्यव्रते तवानागसो अदितये स्याम स्वा
हा॥ इदं वरुणाय न मम॥ ॐ प्रजापतय इति प्रजापति ऋषिस्त्रिष्टुप्छ
न्दः प्रजापतिर्देवता आज्यहोमे विनियोगः॥ ॐ प्रजापतये स्वाहा इदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रजापतये न मम॥ ॐ अग्नय इत्यस्य प्रजापतिऋषिर्गायत्री छन्दोऽग्नि
४२ र्देवता स्विष्टकृद्धोमे विनियोगः॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्न
ये स्विष्टकृते न मम॥ ततः संस्रवं प्राश्य आचम्य पवित्राभ्यां मुखं मा
र्जयित्वा पवित्रे अग्नौ क्षिपेत्॥ ततः पूर्णपात्रमादाय कुशादीन्यादाय
अद्येह काश्यपगोत्रस्य खगेन्द्रराज शर्मणो मम राजमानकुमारस्य छत्रराजवीर-
विक्रम नाम्नो ब्रह्मचारिणः समावर्तनहोमकर्मणि कृताकृतावेक्षणरू रामः
मंप्र पब्रह्मकृतिष्ठार्थमिदं तण्डुलपूर्णपात्रं प्रजापतिदैवतं गोत्राय शा ४२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शर्मणे ब्राह्मणाय ब्रह्मणे तुभ्यमहं संप्रददे ॥ इति दद्यात् ॥ ब्रह्मा
च स्वस्ति इति ब्रूयात् ॥ ॐ सुमित्रिया दुर्मित्रिया इति द्वयोः प्रजापतिरृ
षिर्यजुरापो देवता प्रणीताविमोके विनियोगः ॥ ॐ सुमित्रियान आप ओ
षधयः सन्तु ॥ इति प्रणीताजलेन शिरोऽभिषिच्य । ॐ दुर्मित्रियास्तस्मै
सन्तु योऽस्मान्द्वेष्टियंच वयं द्विष्मः ॥ इति प्रणीतापात्रं सावशिष्टजलमै
शान्यां न्युब्जीकुर्यात् ॥ आस्तरणक्रमेण बर्हिरुत्थाप्य ॐ देवागातुवित्य
स मनसस्पतिरृषिर्विराड्छन्दो वातो देवता बर्हिर्होमे विनियोगः ॥ ॐ देवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गातु विदो गातुं वित्वा गातुमित ॥मनसस्पत इमन्देवयज्ञꣳ स्वाहा वाते
धाः स्वाहा ॥ इति हस्तेन बर्हिर्जुहुयात् ॥ततः प्रभृतिषु ब्रह्मचारि कर्ता॥
४३ ततो ब्रह्मचारी श्रोत्रसमावुद्धौ करौ कृत्वाञ्जलिं विधाय काश्यप
गोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः छत्रराजबीरविक्र–क्रमनामाहं भो वै
श्वानर त्वां अभिवादये ॥ इति वैश्वानरमभिवाद्य काश्यपगोत्रः काश्यपा
वत्सारनैध्रुवेति त्रिप्रवरः छत्रराजबीरविक्रम नामाहं भो वरुण त्वां अभि रामः
वादये ॥ इति वरुणमभिवादयेत् ॥उत्तमेन वाम मणिवन्धे उत्तमं दक्षि ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णमणिबन्धं निधाय पूर्वं स्वकरौ स्पृष्ट्वा उत्तानेन पद्माकारेण
करेण दक्षिणेन दक्षिणं वामेन वामं गुरुचरणं स्पृशन् काश्य
पगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः छत्रराजवीरविक्रमवर्माऽहं
भो गुरो भवन्तं अभिवादये ॥ गुरुश्च आयुष्मान्भव सौम्य छत्रराजवीर वि-
क्रमवर्मन् ३ ॥ इत्याशिषं दद्यात् ॥ ततो ब्रह्मचारी अग्नेः पश्चादुपवि
ष्टो घृताक्तं शुष्कमनिषिद्धं काष्ठादीन्धनं पञ्चभिर्मन्त्रैः प्रतिमन्त्र
मेकैकं पाणिना दक्षिणेनाग्नौ प्रक्षिपेत् ॥ ॐ अग्ने सुश्रव इत्यादी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४४ नां ब्रह्मऋृषिर्यजूंष्यग्निर्देवता समिन्धने विनियोगः॥ ॐ अग्ने सुश्र
वः सौश्रवसं मा कुरु॥१॥ ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि॥२॥
ॐ एवं माꣳ सुश्रवः सौश्रवसं कुरु॥३॥ ॐ यथा त्वमग्ने देवानां यज्ञस्य
निधिपा असि॥४॥ ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासम्
॥५॥ ततः सन्धुक्षितमग्निं दक्षहस्तस्थवारिणा प्रदक्षिणमीशानादी एमः
शानपर्यन्तं पर्युक्ष्य तिस्रः समिधः आदायोत्थाय ॐ अग्नये इत्य ४४
स्य प्रजापतिऋृषिर्गायत्रीच्छन्दः समिद्देवता समिधादाने विनियोगः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ अग्नये समिधमहार्षं बृहते जातवेदसे॥ यथा त्वमग्ने समिधा समि
ध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समि
न्धे॥ जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी ते
जस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳ स्वाहा॥ इत्येकां प्रागग्रां समिध
मग्नौ प्रक्षिप्य मन्त्रावृत्त्या द्वितीयां तृतीयां च प्रक्षिपेत्॥ तत उप
विश्य पूर्ववत्॥ ॐ अग्ने सुश्रव इत्यादीनां ब्रह्मा ऋषिर्यजूंष्यग्निर्देव
ता समिन्धने विनियोगः॥ ॐ अग्ने सुश्रवः सुश्रवसं मा कुरु॥ १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि ॥ २ ॥ ॐ एवं माꣳ सुश्रवः सौ
श्रवसं कुरु ॥ ३ ॥ ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि ॥ ४ ॥

ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ॥ ततः दक्षहस्तस्थ
वारिणा प्रदक्षिणमीशानादीशानपर्यन्तं पर्युक्ष्य हस्तौ तूष्णीमग्नौ
तापयित्वा सप्तभिर्मन्त्रैः प्रतिमंत्रं ललाटाच्चिबुकपर्यन्तं सन्तप्तहस्ता
भ्यां विमृज्यात् ॥ ॐ तनूपा इत्यादीनां बृहद्देवता ऋषयो यजूंष्यग्नि
दैवता मुखविमर्शने विनियोगः ॥ ॐ तनूपा अग्नेसि तन्वं मे पाहि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ आयुर्दा अग्नेस्यायुर्मे देहि ॥२॥ ॐ वर्चोदा अग्नेसि वर्चो मे देहि
॥३॥ ॐ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥४॥ ॐ मेधां मे देवः सवि
ता आदधातु ॥५॥ ॐ मेधां देवी सरस्वती आदधातु ॥६॥ ॐ मेधा
मश्विनौ देवावाधत्तां पुष्करस्रजौ ॥७॥ आचारतः तत्तदङ्गानि हस्ता
ग्रेण स्पृशन् मन्त्रान्पठेत् ॥ ॐ अङ्गानि चम इत्यादीनां प्रजापति ऋ
षिर्यजूंषि लिंगोक्ता देवता आप्यायने विनियोगः ॥ ॐ अङ्गानि चम
आप्यायन्ताम् ॥ शिरः प्रभृति पादान्तं स्पृशेत् ॥ ॐ वाक्चम आप्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यताम्॥पञ्चाङ्गुलीभिर्मुखं स्पृष्ट्वा ॐ प्राणश्चम आप्यायताम्॥
नासिकारन्ध्रे अङ्गुष्ठतर्जनीभ्यां युगपत्स्पृष्ट्वा ॐ चक्षुश्चम आप्या
४६ यताम्॥अनामिकाङ्गुष्ठाभ्यां दक्षिणं चक्षुः स्पृशेत्॥मंत्रावृत्त्या
वामं च॥ॐ श्रोत्रं चम आप्यायताम्॥दक्षिणश्रोत्रं चक्षुर्वत्स्पृशे
त्॥एवं मंत्रावृत्त्या वामम्॥ॐ यशोबलं चम आप्यायताम्॥इत्य
स्य जपमात्रम्॥ॐ त्र्यायुषमित्यस्य नारायणऋषिरुष्णिक्छन्दः रामः
आयुर्देवता भस्मना तिलककरणे विनियोगः॥ॐ त्र्यायुषं जमदग्नेः ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति ललाटे ॥ ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायाम् ॥ ॐ यद्देवेषु
त्र्यायुषम् इति दक्षिणस्कन्धे ॥ ॐ तन्नो अस्तु त्र्यायुषम् इति हृदि
धारयेत् ॥ अग्नेरुत्तरभागे उत्तरदृष्ट्या स्थापितानां वस्त्रादिवेष्टितानां
आम्रादिपल्लवयुतजलपूर्णानां कलशानां। पूर्वभागे आस्तृतपूर्वा
ग्रहरितकुशेषु दक्षिणकलशसमीपे उदङ्मुख ऊर्ध्वीभूय। ॐ ये
स्वन्तारिति मन्त्रस्य प्रजापतिऋषिर्यजुरापो देवता उदकग्रहणे वि
नियोगः ॥ ॐ येप्स्वन्तरग्नयः। प्रविष्टा गोह्य। उपगोह्यो। मयूषो। मनोहा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वलोविरुग्नस्तनूदुष्पुरिन्द्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णा
मि ॥ इति मंत्रेण दक्षहस्तेन प्रथमकुम्भाज्जलं गृहीत्वा ॐ तेन मामभि
४१ न्यस्य प्रजापति ऋषिर्यजुरापोदेवता अभिषेचने विनियोगः ॥ ॐ तेन
मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय ॥ इति मन्त्रेण
तेन जलेन शिरोऽभिषिञ्चेत् ॥ ततो द्वितीयकलशसमीपं गत्वा ॐ रामः
येष्व न्तारिति मन्त्रेण जलं गृहीत्वा ॐ येन श्रियमित्यस्य प्रजापति ४१
ऋषिर्यजुरापोदेवता अभिषेचने विनियोगः ॥ ॐ येन श्रियमकृणुतां ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नावमृशाता ॐ सुराम् ॥ येनाक्ष्याव भ्यषिञ्चतां यद्वा तदश्विना यशः ॥
इति मन्त्रेण तेन जलेन शिरोऽभिषिञ्चेत् ॥ ततस्तृतीयकलशज
लम् ॐ येरवन्तारिति मन्त्रेण गृहीत्वा ॐ आपो हिष्ठेत्यादीनां
सिन्धुद्वीप ऋषिर्गायत्री छन्द आपो देवता अभिषेचने विनियोगः ॥
ॐ आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन ॥ महे रणाय चक्षसे ॥
इति मंत्रेण तेन जलेन शिरोऽभिषिञ्चेत् ॥ ततश्चतुर्थकलशजलम्
ॐ येरवन्तारिति मन्त्रेण गृहीत्वा ॐ यो वः शिवतमो रसस्तस्य भा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जयते हनः॥उशती रिव मातरः॥इति मन्त्रेण तेन जलेन शिरोऽभिषि
ञ्चेत्॥ततः पञ्चमकलशजलम् ॐ येप्सवन्तारिति मन्त्रेण गृहीत्वा
४८ ॐ नमसा अरद्गमामवो यस्य क्षयाय जिन्वथ॥आपोजनयथा चनः॥
इति मन्त्रेण तेन जलेन शिरोऽभिषिञ्चेत्॥ततः षष्ठकलशजलम्
ॐ येप्सवन्तारिति मन्त्रेण गृहीत्वा तूष्णीं शिरोऽभिषिञ्चेत्॥ततः स
प्तमकलशजलं ॐ येप्सवन्तारिति मन्त्रेण गृहीत्वा तूष्णीं शिरोऽभि रामः
षिञ्चेत्॥ततोऽष्टमकलशजलं ॐ येप्सवन्तारिति मन्त्रेण गृहीत्वा ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तूष्णीं शिरोऽभिषिञ्चेत् ॥ ततो मेखलाम् ॐ उदुत्तममिति शुनःशेफ
ऋषिस्त्रिष्टुप्छन्दो वरुणो देवता मेखलोन्मोके विनियोगः ॥ ॐ उदुत्त
मं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय ॥ अथा वयमादित्य
व्रते तवानागसो अदितये स्याम ॥ इति मन्त्रेण शिरो मार्गेण निःसा
र्य भूमौ निक्षिप्य दण्डम् अजिनं च उत्तराग्रं निधाय अन्यद्वासः प
रिधाय ॐ उद्यदिति मन्त्रस्य प्रजापतिऋषिरतिशक्वरीछन्द आदि
त्यो देवता उपस्थाने विनियोगः ॥ ॐ उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्
प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मागमय ॥ उद्यन्भ्राजभृष्णु
रिन्द्रो मरुद्भिरस्था

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दिशा यावभिरस्थाच्छनसनिरसि शातसनिं माकुर्वाः ऽ विदन्मागमय ॥ उ
घन्भ्रान्मृष्णु रिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थान्सहस्त्रसनिरसि स
४९ हस्त्रसनिं माकुर्वाः ऽ विदन्मागमय ॥ इति मन्त्रेण सूर्यमुपस्थाय ततो
दक्षिणहस्तमभ्यग तसोमतीर्थेन दधि तिलान् वा प्राश्य केशान्नखां
श्च उदकसंस्थो वापयित्वा स्नात्वा आचम्य कनिष्ठाग्रसमस्थूलप्रक्षा
लित दशाङ्गुलदीर्घौदुम्बरकाष्ठेन दन्तान् ॐ अन्नाद्यायेत्यस्य आ ग्रमः
थर्वणऋषिरनुष्टुप्छन्दः सोमो देवता दन्तधावने विनियोगः॥ ॐ अन्ना ४९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घायव्यूहत्वर्ड० सोमो राजायमागमत् ॥ स मे मुखं प्रमार्क्ष्यति यशसा
च भगेन च ॥ इति मन्त्रेण धावयेत् ॥ तत्काष्ठं प्रक्षाल्य प्रागुदग्वा
त्यजेत् ॥ द्वादशगण्डूषैर्मुखं प्रक्षाल्य सुगन्धि वस्तु मिश्रित सर्षपादिचू
र्णरूपोद्वर्तनादिना शरीरमुद्वर्त्य पुनर्मलापकर्षस्नानं कृत्वा प्रोञ्छ्य
आचम्य आर्द्रवासा एव हस्ताभ्यां चन्दनाद्यनुलेपं गृहीत्वा ॐ प्राणा
पानाविन्यस्य प्रजापतिरृषिर्यजुः प्राणापानौ देवते चन्दनोपग्रहणे
विनियोगः ॥ ॐ प्राणापानौ मे तर्पयत ॥ ॐ चक्षुर्मे तर्पयत ॥ ॐ श्रोत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

५० मे नर्पयत ॥ इति मन्त्रेण नासिका विले मुखं च स्पृष्ट्वा कस्मिंश्चित्पात्रे
हस्तौ प्रक्षाल्य अपसव्यं विधाय हस्तप्रक्षालनोदकमञ्जलिनाऽऽदा
दाय दक्षिणाभिमुखो पितृतीर्थेन दक्षिणादिशि भूमौ ॐ पितर इत्यस्य
प्रजापतिरृषिर्यजुः पितरो देवता पाण्यवनेजन निषेके विनियोगः ॥ ॐ
पितरः शुन्धध्वम् ॥ इति मन्त्रेण निषिञ्चेत् ॥ ततः सव्यं कृत्वा उदकं स्पृ रामः
शेत् ॥ चन्दनादि गृहीत्वा अनुलिप्य सुचक्षा इति मन्त्रस्य प्रजापति
ऋषिर्यजुराशी देवता जपे विनियोगः ॥ ॐ सुचक्षा अहमक्षीभ्यां भूया ५०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्ᳲ सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम् ॥ इति मन्त्रं जपेत् ॥ ततोः
रजकधौतं श्वेतं परिधानीयम् ॥ ॐ परिधास्ये इति मन्त्रस्य आलम्बा
यनऋषिः पंक्तिश्छन्दो वासो देवता वस्त्रपरिधाने विनियोगः ॥ ॐ प
रिधास्ये यशोधास्ये दीर्घायुत्वा यजरदष्टिरस्मि शतं च जीवामि शरदः
पुरूची रायस्पोषमभि संव्ययिष्ये ॥ इति मन्त्रेण परिधाय द्विराचम्य
यज्ञोपवीतं गृहीत्वा ॐ यज्ञोपवीतमित्यस्य परमेष्ठी ऋषिस्त्रिष्टुप्छ
न्दो लिङ्गोक्ता देवता यज्ञोपवीतधारणे विनियोगः ॥ ॐ यज्ञोपवीतं पर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रति मुञ्च शुभ्रं
यज्ञोपवीतं बलमस्तु तेजः ॥ ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवी
५१ तेनोपनह्यामि ॥ इति मन्त्रेण दक्षिणबाहुमुद्धृत्य वामस्कन्धे धारयेत् ॥
आचम्य ततोऽरजकधौतमुत्तरीयम् ॥ ॐ यशसा मेत्यस्याथर्वण ऋषिः
पंक्तिश्छन्दो लिङ्गोक्ता देवता उत्तरीयवस्त्रधारणे विनियोगः ॥ ॐ यश रामः
सा मां द्यावापृथिवी यशसेन्द्रा बृहस्पती ॥ यशो भगश्च मा विदद्यशो मा ५१
प्रतिपद्यताम् ॥ इति मन्त्रेण धारयित्वा द्विराचमेत् ॥ ततो गुरुणा दत्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नि पुष्पमाल्यानि ॐ या आहरदिति मन्त्रस्य भरद्वाजऋषिरनुष्टुप्छन्दः
सुमनसो देवता पुष्पमाल्यग्रहणे विनियोगः॥ ॐ या आहरज्जमदग्निः
श्रद्धायै मेधायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन
च॥ इति मन्त्रेण प्रतिगृह्य ॐ यद्यशा इति मन्त्रस्य भरद्वाज ऋषिरनुष्टु
प्छन्दः सुमनसो देवता पुष्पबन्धने विनियोगः॥ ॐ यद्यशोप्सरसामिन्द्र
श्चकार विपुलं पृथु॥ तेन सङ्ग्रथिताः सुमनस आबध्नामि यशोमयि॥ इति मन्त्रेण शिरसि बध्नीत॥ उष्णीषं गृहीत्वा ॐ युवासु इति मंत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य विश्वामित्रऋषिस्त्रिष्टुप्छन्दो यूपो देवता शिरोवेष्टने विनियोगः॥
सुवा ॐ युवासुवासाः परिवीत आगात्स उश्रेयान्भवति जायमानः॥ तन्धीरासः क
५२ वय उन्नयन्ति स्वाध्यो मनसा देवयन्तः॥ इति मन्त्रेण शिरो वेष्टयते॥
कुराउले गृहीत्वा ॐ अलङ्करणमित्यस्य भरद्वाजऋषिरुष्णिक्छन्दो
ऽलङ्करणं देवता अलङ्करणे विनियोगः॥ ॐ अलङ्करणमसि भूयोऽल
ङ्करणं भूयात्॥ इति मन्त्रेण दक्षिणकर्णे धारयेत्॥ मन्त्रावृत्त्या एमः
वामकर्णे च॥ अञ्जनं गृहीत्वा ॐ वृत्रस्येति मन्त्रस्य प्रजापतिऋषि ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्री छन्दो अञ्जनं देवता चक्षुरञ्जने विनियोगः॥ ॐ वृत्रस्यासि
कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि॥ इति मन्त्रेण वामनेत्रमञ्जयि
त्वा मन्त्रावृत्त्या दक्षिणनेत्रं चाञ्जयेत्॥ ततः कञ्चुकादीनि परिधाय
आचामेत्॥ दर्पणं गृहीत्वा ॐ रोचिष्णुरितिमंत्रस्य प्रजापतिरृषिर्य
जुरादर्शो देवता आदर्शप्रेक्षणे विनियोगः॥ ॐ रोचिष्णुरसि॥ इति म
न्त्रेण मुखप्रभृति सर्वदेहं आदर्शे प्रेक्षेत॥ ततो गुरुणा दत्तं छत्रम्
ॐ बृहस्पतेरिति मन्त्रस्य गौतमऋषिर्बृहद्गायत्री छन्दश्छत्रं देवता छत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रहणे विनियोगः ॥ ॐ बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो
यशसो मा न्तर्धेहि ॥ इति मन्त्रेण गृह्णीत ॥ तत उपानहौ ॐ प्रतिष्ठे
५३ स्थ इत्यस्य विश्वामित्र ऋषिर्विराट् छन्दो लिङ्गोक्ता देवता उपानत्परि
धाने विनियोगः ॥ ॐ प्रतिष्ठे स्थो विश्वतो मा पातम् ॥ इति मन्त्रेण यु
गपत्परिदधाति ॥ ततो वंशदण्डम् ॐ विश्वाभ्य इत्यस्य याज्ञवल्क्य रम:
ऋषिस्त्रिष्टुप्छन्दो दण्डो देवता दण्डग्रहणे विनियोगः ॥ ॐ विश्वाभ्यो
मा नाष्ट्राभ्यः परिपाहि सर्वतः ॥ इति मन्त्रेणाददीत ॥ ततो रथमारुह्य ५३

आ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वोत्तरं गच्छेत् ॥ अत्रैव देशान्तरश्रवणमित्याचारः ॥ ततो मातुलादि
मार्गे गत्वा तन्निवर्तयेत् ॥ ततो गुरुः स्नातककरस्पृष्टेन सफलघृत
पूर्णस्रुवेण ॐ मूर्धानमित्यस्य भरद्वाजऋषिस्त्रिष्टुप्छन्दोऽग्निर्देव
ता पूर्णाहुतिहोमे विनियोगः ॥ ॐ मूर्धानन्दिवोऽअरतिम्पृथिव्या वैश्वा
नरमृतऽआजातमग्निम् ॥ कविᳩ सम्राजमतिथिञ्जनानामासन्नापा
त्रं जनयन्त देवाः स्वाहा ॥ इदमग्नये न मम ॥ इति मन्त्रेण पूर्णाहुतिं
जुहुयात् ॥ ततो गां तन्मूल्योपकल्पितद्रव्यं वा सम्पूज्य कुशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दीन्यादाय अथेह काश्यपगोत्रः काश्यपावत्सारनैध्रुवेति त्रिप्रवरः
छत्रराजवीर विक्रम शर्माहं मम [illegible] समावर्तनकर्मणः साङ्ग
५८ तासिद्धये इमां सुपूजितां यथोपपन्नोपस्करसहितां गां रुद्रदेवता
कां [illegible] काश्यपगोत्राय शर्मणे आचार्याय दातु
महमुत्सृजे ॥ इति दत्वा कपिले सर्वदेवानां पूजनीयासि रोहिणी ॥ रामः
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥ इति प्रार्थ्य दानप्रतिष्ठां
दद्यात् ॥ अद्यकृतैतद्गोदानकर्मणः [illegible] साङ्ग ५८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलप्राप्त्यर्थं रौप्यखण्डं चन्द्रदैवतं काश्यपगोत्राय   शर्मणे आ
चार्याय तुभ्यमहं संप्रददे ॥ ततोग्निस्थापनोक्त हवनादि पूर्णपात्रदानं
पूर्णाहुतिहोमं गोदानं भूयसीदक्षिणादानं च कृत्वा ग्रहादीन्विसृजे
त्॥ कलशोदकेन यजमानादीनभिषेचयेत् ॥   ॥सर्वे समुद्राः स
रितस्तीर्थानि जलदा नदाः ॥आयान्तु यजमानस्य दुरितक्षयकार
काः॥१॥हरिः ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः
शान्तिरोषधयः शान्तिः ॥वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तिः सर्व्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ २ ॥ ॐ तच्च
क्षुर्द्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतञ्जीवेम शरदः शत
५५ ं शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं
भूयश्च शरदः शतात् ॥ ३ ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा
विश्ववेदाः ॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधा
तु ॥ ४ ॥ विश्वानि देव सवितर्दुरितानि परासुव ॥ यद्भद्रन्तन्न आसुव ॥ एमः
ॐ शान्तिरस्तु । पुष्टिरस्तु । तुष्टिरस्तु । अस्तु । सर्वारिष्टशान्तिर्भवतु ॥ ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्पापं रोगः शोको दुःखं दारिद्र्यं तद्भूमौ प्रतिहतमस्तु ॥ ॐ अमृ
ताऽभिषेकोऽस्तु ॥ ॥ इति संक्षिप्ताभिषेकः ॥ ॥ शुभम् ॥ ॥
तिलकप्रसादमन्त्राः ॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात् पवमानं
महीयते ॥ धान्यं धनं पशून्बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
अव्याधिना शरीरेण मनसा च निराधिना ॥ पूरयन्नर्थिनामाशा एमः
स्त्वं जीव शरदां शतम् ॥ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोर
थाः ॥ शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥ ॥ इति समावर्तनम् ॥ ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu